# वेद मन्त्राः

# *Veda Mantras*

DEVANĀGARĪ & RCCS

Vol. 1

www.sanskritveda.net
www.vedavishwa.com

## Gaṇapati Prārthanā

[(1) KYV TS 2-3-14-14 ; RV 2-23-1
(2) KYV TS 1-8-22-3 ; 2-5-12-7 ; 3-1-11-9 ; RV 6-61-4]

ॐ ग॒णानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम् ।
ज्ये॒ष्ठ॒राजं॒ ब्रम्ह॑णां ब्रम्हणस्पत॒ , आ नः॑ शृ॒ण्वन्नू॒तिभि॑ः सीद॒ साद॑नम् ॥

ॐ gaṇānāān’ tvā gaṇapatigm’ havāmahē
kaviṅ’ kavīnāmupamaśh’ravas’tamam ।
jyēēṣh’ṭha rājam’ bram’haṇām’ bram’haṇas’pata ,
ā naśh’ śhṛṇ’van’nūtibhis’ sīda sādanam ॥ (1)

प्रणो॑ दे॒वी सर॑स्वती॒ वाजे॑भि॒र्वाजि॒नी॑वती । धी॒नाम॑वि॒त्र्य॑वतु ॥
ग॒णे॒शाय॑ नमः । स॒रस्व॒त्यै नमः॑ । श्री॒ गु॒रुभ्यो॒ न॒म॒ः । ह॒रि॑ः ॐ ॥

praṇō dēvī saras’vatī vājēbhir’vājinīvatī ।
dhīnāmavit’ryavatu ॥ (2)
gaṇēśhāya namaḥa । saras’vat’yai namaḥa ।
śhrī- gurubh’yō namaḥa । harihi , ॐ ॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Gaṇapati Atharva Śhīrṣha Upaniṣhat

[as per tradition]

ॐ भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः । भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः ।
स्थि॒रैरङ्गै᳚स्तुष्टु॒वाꣳस॑स्त॒नूभि॑ः । व्यशे॑म दे॒वहि॑तं॒ यदायु॑ः ।

ॐ bhad’raṅ’ kar’ṇēbhiśh’ śhṛṇuyāma dēvā-ḥa ।
bhad’ram’ paśh’yēmāk’ṣhabhir’yajat’rā-ḥa ।
sthirairaṅ’gais’tuṣh’ṭuvāgm’sas’tanūbhiḥi ।
vyaśhēma dēvahitañ’ yadāyuḥu ।

www.vedavishwa.com

स्व॒स्ति न॒ , इन्द्रौ वृ॒द्धश्र॑वाः । स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः ।

svas’ti na , in’drō vṛd’dhaśh’ravā-ḥa ǀ

svas’ti na[fp]’ pūṣhā viśh’vavēdā-ḥa ǀ

स्व॒स्ति न॒स्ताक्ष्यो॒ , अरि॑ष्टनेमिः । स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु ।

svas’ti nas’tārk’ṣhyō , ariṣh’ṭanēmiḥi ǀ

svas’ti nō bṛhas’patir’dadhātu ǀ

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ǁ

ॐ नम॑स्ते ग॒णप॑तये ।

ॐ namas’tē gaṇapatayē ǀ

त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि । त्वमे॒व के॒वल॒ं कर्ता॑ऽसि ।

tvamēvap’ prat’yak’ṣhan’ tat’tvamasi ǀ

tvamēva kēvalaṅ’ kar’tā (a)si ǀ

त्वमे॒व के॒वल॒ं धर्ता॑ऽसि । त्वमे॒व के॒वल॒ं हर्ता॑ऽसि ।

tvamēva kēvalan’ dhar’tā (a)si ǀ

tvamēva kēvalaṁ’ har’tā (a)si ǀ

त्वमेव सर्वं खल्विदं ब्रम्हा॒सि । त्वं साक्षादात्मा॑ऽसि नि॒त्यम् ॥ १ ॥

tvamēva sar’vaṅ’ khal’vidam’ bram’hāsi ǀ

tvaṁ’ sāk’ṣhādāt’mā (a)si nit’yam ǁ 1 ǁ

ऋ॒तं व॒च्मि । स॒त्यं व॒च्मि ॥ २ ॥

ṛtaṁ’ vat’chmi ǀ sat’yaṁ’ vat’chmi ǁ 2 ǁ



www.saivedavishwa.com

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् ।

avat’ tvam’ mām | ava vak’tāram’m |
avaśh’ śhrōtāram’m | ava dātāram’m |

अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् ।
अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् ।

ava dhātāram’m | avānūchānamava śhiṣh’yam |
ava paśh’chāt’tāāte | ava puras’tāāte | avōt’tarāt’tāāte |
ava dak’ṣhiṇāt’tāāte |

अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥३॥

ava chōr’dhvāt’tāāte | avādharāt’tāāte |
sar’vatō mām’ pāhi pāhi saman’tā-te || 3 ||

त्वं वाङ्मयस्त्वं चिन्मयः । त्वं आनन्दमयस्त्वं ब्रम्हमयः ।

tvaṁ’ vāṅg’mayas’tvañ’ chin’mayaḥa |
tvamānan’damayas’tvam’ bram’hamayaḥa |

त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रम्हासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥

tvaṁ’ sat’chidānan’dād’vitīyō (a)si |
tvam’ prat’yak’ṣham’ bram’hāsi |
tvañ’ jñānamayō vij’ñānamayō (a)si || 4 ||

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।

sar’vañ’ jagadidan’ tvat’tō jāyatē |
sar’vañ’ jagadidan’ tvat’tas’tiṣh’ṭhati |

www.shivaveda.net www.vedavishva.com

सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।

sar'vañ' jagadidan' tvayi layamēṣh'yati ।
sar'vañ' jagadidan' tvayip' prat'yēti ।

त्वं भूमिरापोऽनलोऽनिलोनभः । त्वं चत्वारि वाक्पदानि ॥५॥

tvam' bhūmirāpō (a)nalō (a)nilōnabhaḥa ।
tvañ' chat'vāri vāāk'padāni ॥ 5 ॥

त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः ।

tvaṅ' guṇat'rayātītaḥa । tvamavas'thāt'rayātītaḥa ।

त्वं देहत्रयातीतः । त्वं कालत्रयातीतः ।

tvan' dēhat'rayātītaḥa । tvaṅ' kālat'rayātītaḥa ।

त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः ।
त्वां योगिनो ध्यायन्ति नित्यम् ।

tvam' mūlādhāras'thitō (a)si nit'yam ।
tvaṁ' śhak'tit'rayāt'makaḥa ।
tvāñ' yōginōd' dhyāyan'ti nit'yam ।

त्वं ब्रम्हा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रम्ह भूर्भुवस्स्वरोम् ॥६॥

tvam' bram'hāt' tvaṁ' viṣh'ṇus'tvaṁ'
rud'ras'tvamin'dras'tvamag'nis'tvaṁ'
vāyus'tvaṁ' sūr'yas'tvañ' chan'dramās'tvam'
bram'ha bhūr'bhuvas'svarō-m ॥ 6 ॥

www.sanskritdocuments? www.vedavishwa.com

गणादीं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् । अनुस्वारः परतरः ।

gaṇādīīm’ pūr’vamut’chār’ya

var’ṇādīīṁ’stadanan’taram ।

anus’vāra[fp]’ parataraḥa ।

अर्धेन्दु लसितम् । तारेण , ऋद्धम् । एतत् तव मनुस्वरूपम् ।

ar’dhēēn’du lasitam । tārēṇa , ṛd’dham ।

ētat’ tava manus’varūpam ।

गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् ।

gakāra[fp]’ pūūr’varūpam । akārō madh’yamarūpam ।

anus’vāraśh’chāān’tyarūpam ।

बिन्दुरुत्तररूपम् । नादः सन्धानम् ।

bin’durut’tararūpam । nādas’ san’dhānam ।

सꣳहिता सन्धिः । सैषा गणेश विद्या ।

sagm’hitā san’dhiḥi । saiṣhā gaṇēśha vid’yā ।

गणक , ऋषिः । निचृद्गायत्रीच्छन्दः ।

gaṇaka , ṛṣhiḥi । nichṛd’gāyat’rīt’chhan’daḥa ।

गणपतिर्देवता । ॐ गं गणपतये नमः ॥७॥

gaṇapatir’dēvatā । ॐ gaṅ’ gaṇapatayē namaḥa ॥ 7 ॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥८॥

ēkadan’tāya vid’mahē vak’ratuṇ’ḍāya dhīmahi ।

tan’nō dan’ti[fp]’ prachōdayāāte ॥ 8 ॥

www.stivedaVishwa.com

एकदन्तं चतुर्हस्तं पाशमङ्कुश धारिणम् ।
रदं च वरदं हस्तै-र्बिभ्राणं मूषक-ध्वजम् ॥

ēkadan'tañ' chatur'has'tam'
pāśhamaṅ'kuśha dhāriṇam |
radañ' cha varadaṁ'
has'tair'bibh'rāṇam' mūṣhakadh'vajam ||

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्त-गन्धानुलिप्ताङ्गं रक्त-पुष्पैस्सुपूजितम् ॥

rak'taṁ' lam'bōdaraṁ'
śhūr'pakar'ṇakaṁ' rak'tavāsasam |
rak'tagan'dhānulip'tāṅ'gaṁ'
rak'tapuṣh'pais'supūjitam ||

भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतञ्च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥

bhak'tānukam'pinan' dēvañ'
jagat'kāraṇamat'chyutam |
āvir'bhūtañ'cha sṛṣh'ṭyādaup'
prakṛtēē[fp]' puruṣhāt'param ||

एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥

ēvan' dhyāyati yō nit'yaṁ'
sa yōgī yōgināṁ' varaḥa || 9 ||

www.sanskritvedavishwa.com

नमो व्रातपत्ये । नमो गणपतये । नमः प्रमथपतये ।
नमस्ते , अस्तु लम्बोदरायैकदन्ताय
विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥१०॥

**namōv' vrātapatayē I namō gaṇapatayē I**
**nama[fp]' pramathapatayē I**
**namas'tē , as'tu lam'bōdarāyaikadan'tāya**
**vigh'nanāśhinē śhivasutāya**
**varadamūr'tayē namaḥa II 10 II**

एतदथर्वशीर्षं योऽधीते स ब्रम्हभूयाय कल्पते । स सर्व विघ्नैर्न बाध्यते ।

**ētadathar'vaśhīr'ṣhañ' yō (a)dhītē**
**sab' bram'habhūyāya kal'patē I**
**sa sar'va vigh'naiīr'na bādh'yatē I**

स सर्वत्र सुखमेधते । स पञ्चमहापापात् प्रमुच्यते ।

**sa sar'vat'ra sukhamēdhatē I**
**sa pañ'chamahāpāpāat' pramut'chyatē I**

सायमधीयानो दिवसकृतं पापं नाशयति ।
प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

**sāyamadhīyānō divasakṛtam' pāpan' nāśhayati I**
**prātaradhīyānō rāt'rikṛtam' pāpan' nāśhayati I**

सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति ।
सर्वत्राधीयानोऽपविघ्नो भवति ।

**sāyam' prāta[fp]' prayuñ'jānō pāpō (a)pāpō bhavati I**
**sar'vat'rādhīyānō (a)pavigh'nō bhavati I**



www.saiveda.net www.vedaviswa.com

धर्मार्थकाममोक्षंञ्च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् ।
dhar’mār’thakāmamōk’ṣhañ’cha vin’dati ।
idamathar’vaśhīr’ṣhamaśhiṣh’yāya na dēyam ।

यो यदि मोहाद् दास्यति स पापीयान् भवति ।
सहस्रावर्तनाद् यं यं काममधीते तं तमनेन साधयेत् ॥११॥
yō yadi mōhād’ dās’yati sa pāpīyān’ bhavati ।
sahas’rāvar’tanād’ yañ’ yaṅ’
kāmamadhītē tan’ tamanēna sādhayē-te ॥ 11 ॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति ।
anēna gaṇapatimabhiṣhiñ’chati sa vāg’mī bhavati ।

चतुर्थ्यामनश्नं जपति स विद्यावान् भवति । इत्यथर्वण वाक्यम् ।
chatur’thyāmanaśh’nañ’ japati sa vid’yāvān’ bhavati ।
it’yathar’vaṇa vāk’yam ।

ब्रम्हाद्यावरणं विद्यान् न बिभेति कदाचनेति ॥१२॥
bram’hād’yāvaraṇaṁ’
vid’yān’ na bibhēti kadāchanēti ॥ 12 ॥

यो दूर्वाङ्कुरै-र्यजति स वैश्रवणोपमो भवति ।
yō dūr’vāṅ’kurair’yajati sa
vaiśh’ravaṇōpamō bhavati ।

यो लाजै-र्यजति स यशोवान् भवति । स मेधावान् भवति ।
yō lājair’yajati sa yaśhōvān’ bhavati ।
sa mēdhāvān’ bhavati ।

www.sanskritweb / www.vedaviswa.com

यो मोदकसहस्रेण यजति स वाञ्छित फलमवाप्नोति ।

yō mōdakasahas’rēṇa yajati sa
vāñ’chhita phalamavāp’nōti ।

यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥१३॥

yas’ sāj’yasamid’bhir’yajati sa sar’vaṁ’ labhatē
sa sar’vaṁ’ labhatē ॥ 13 ॥

अष्टौ ब्राम्हणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति ।

सूर्यग्रहे महानद्यां प्रतिमा सन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति ।

aṣh’ṭaub’ brām’haṇān’ sam’yag’ grāhayit’vā
sūr’yavar’chas’vī bhavati ।

sūr’yag’rahē mahānad’yām’ pratimā san’nidhau
vā jap’tvā sid’dhaman’trō bhavati ।

महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते ।

mahāvigh’nāat’ pramut’chyatē ।

mahādōṣhāat’ pramut’chyatē ।

mahāp’rat’yavāyāat’ pramut’chyatē ।

स सर्वविद् भवति स सर्वविद् भवति ।

य , एवं वेद । इत्युपनिषत् ॥१४॥ (भद्रं...)

sa sar’vavid’ bhavati sa sar’vavid’ bhavati ।

ya , ēvaṁ’ vēda । it’yupaniṣhate ॥ 14 ॥ (bhad’raṅ...)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.saiveda.net www.vedavishwa.com

## Śhivōpāsanā Mantrāḥa

[KYV TA 10-16-1 to 10-25-1]

ॐ निधनपतये नमः ॥१॥ निधनपतान्तिकाय नमः ॥२॥

ॐ nidhanapatayē namaḥa ॥ 1 ॥

nidhanapatān'tikāya namaḥa ॥ 2 ॥

ऊर्ध्वाय नमः ॥३॥ ऊर्ध्वलिङ्गाय नमः ॥४॥

ūrdh'vāya namaḥa ॥ 3 ॥ ūrdh'valiṅ'gāya namaḥa ॥ 4 ॥

हिरण्याय नमः ॥५॥ हिरण्यलिङ्गाय नमः ॥६॥

hiraṇ'yāya namaḥa ॥ 5 ॥ hiraṇ'yaliṅ'gāya namaḥa ॥ 6 ॥

सुवर्णाय नमः ॥७॥ सुवर्णलिङ्गाय नमः ॥८॥

suvar'ṇāya namaḥa ॥ 7 ॥ suvar'ṇaliṅ'gāya namaḥa ॥ 8 ॥

दिव्याय नमः ॥९॥ दिव्यलिङ्गाय नमः ॥१०॥

div'yāya namaḥa ॥ 9 ॥ div'yaliṅ'gāya namaḥa ॥ 10 ॥

भवाय नमः ॥११॥ भवलिङ्गाय नमः ॥१२॥

bhavāya namaḥa ॥ 11 ॥ bhavaliṅ'gāya namaḥa ॥ 12 ॥

शर्वाय नमः ॥१३॥ शर्वलिङ्गाय नमः ॥१४॥

śhar'vāya namaḥa ॥ 13 ॥ śhar'valiṅ'gāya namaḥa ॥ 14 ॥

शिवाय नमः ॥१५॥ शिवलिङ्गाय नमः ॥१६॥

śhivāya namaḥa ॥ 15 ॥ śhivaliṅ'gāya namaḥa ॥ 16 ॥

ज्वलाय नमः ॥१७॥ ज्वललिङ्गाय नमः ॥१८॥

jvalāya namaḥa ॥ 17 ॥ jvalaliṅ'gāya namaḥa ॥ 18 ॥

आत्माय नमः ॥१९॥ आत्मलिङ्गाय नमः ॥२०॥

āt'māya namaḥa ॥ 19 ॥ āt'maliṅ'gāya namaḥa ॥ 20 ॥

परमाय नमः ॥२१॥ परमलिङ्गाय नमः ॥२२॥

paramāya namaḥa ॥ 21 ॥ paramaliṅ'gāya namaḥa ॥ 22 ॥

www.saiveda.net www.vedavishwa.com

एतथ्सोमस्य॑ सूर्य॑स्य सर्वलिङ्ग॑ꣳ स्थापयति पाणिमन्त्रं॑ पवित्रम् ॥२३॥

ētath'sōmas'ya sūr'yas'ya sar'valiṅ'gag'ges' sthāpayati
pāṇiman'tram' pavit'ram ‖ 23 ‖

स॒द्योजा॒तं प्र॑पद्या॒मि स॒द्योजा॒ताय॒ वै नमो॒ नमः॑ ।
भ॒वेभ॑वे॒ नाति॑भवे भवस्व॒ माम् । भ॒वोद्भ॑वाय॒ नमः॑ ॥२४॥

sad'yōjātam' prapad'yāmi
sad'yōjātāya vai namō namaḥa ǀ
bhavē bhavē nātibhavē bhavas'va mām ǀ
bhavōd'bhavāya namaḥa ‖ 24 ‖

वा॒म॒दे॒वाय॒ नमो॒ ॥२५॥ ज्ये॒ष्ठाय॒ नमः॑श् ॥२६॥
श्रे॒ष्ठाय॒ नमो॒ ॥२७॥ रु॒द्राय॒ नमः॑ ॥२८॥
काला॑य॒ नमः॑ ॥२९॥ कल॑विकरणाय॒ नमो॒ ॥३०॥
बल॑विकरणाय॒ नमो॒ ॥३१॥ बला॑य॒ नमो॒ ॥३२॥
बल॑प्रमथनाय॒ नमस् ॥३३॥ सर्व॑भूतदमनाय॒ नमो॒ ॥३४॥
म॒नोन्म॑नाय॒ नमः॑ ॥३५॥

vāmadēvāya namōōd' ‖ 25 ‖ jyēṣh'ṭhāya namaśh' ‖ 26 ‖
śhrēṣh'ṭhāya namō ‖ 27 ‖ rud'rāya nama[hk]' ‖ 28 ‖
kālāya nama[hk]' ‖ 29 ‖ kalavikaraṇāya namō ‖ 30 ‖
balavikaraṇāya namō ‖ 31 ‖ balāya namō ‖ 32 ‖
balap'ramathanāya namas' ‖ 33 ‖
sar'vabhūta damanāya namō ‖ 34 ‖
manōn'manāya namaḥa ‖ 35 ‖



www.shivedavishwa.com

अघोरे॑भ्योऽथ घोरे॑भ्यो घोरघोर॑तरेभ्यः ।
सर्वे॑भ्यस्सर्व शर्वे॑भ्यो नम॑स्ते , अस्तु रुद्ररू॑पेभ्यः ॥३६॥

aghōrēēbh'yō (a)tha ghōrēēbh'yō
ghōraghōratarēbh'yaḥa ǀ
sar'vēēbh'yas' sar'vaśhar'vēēbh'yō namas'tē ,
as'tu rud'rarūpēbh'yaḥa ǁ 36 ǁ

तत्पुरु॑षाय विद्महे॑ महादेवाय॑ धीमहि । तन्नो॑ रुद्रः प्रचोदया॑त् ॥३७॥

tat'puruṣhāya vid'mahē mahādēvāya dhīmahi ǀ
tan'nō rud'ra[fp]' prachōdayāāte ǁ 37 ǁ

ईशानस्सर्व॑विद्यानामीश्वरस्सर्व॑भूतानां ब्रम्हाधि॑पतिर्ब्रम्हणोऽधि॑पतिर्ब्रम्हा॑
शिवो मे॑ , अस्तु सदाशिवोम् ॥३८॥

īśhānas' sar'vavid'yānāmīśh'varas' sar'vabhūtānām'
bram'hādhipatir' bram'haṇō (a)dhipatir'
bram'hā śhivō mē , as'tu sadāśhivōm ǁ 38 ǁ

नमो हिरण्यबाहवे हिरण्यवर्णा॑य हिरण्यरूपाय
हिरण्यपतयेऽम्बिकापतय ,
उमापतये पशुपत॑ये नमो नमः ॥३९॥

namō hiraṇ'yabāhavē hiraṇ'yavar'ṇāya hiraṇ'yarūpāya
hiraṇ'yapatayē (a)m'bikāpataya ,
umāpatayē paśhupatayē namō namaḥa ǁ 39 ǁ

www.saiveda.net www.vedavishwa.com

ऋतꣳ सत्यं परं ब्रम्ह पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥४०॥

ṛtagm’ sat’yam’ param’
bram’ha puruṣhaṅ’ kṛṣh’ṇapiṅ’galam ।
ūrdh’varētaṁ’ virūpāk’ṣham’
viśh’varūpāya vai namō namaḥa ॥ 40 ॥

सर्वो वै रुद्रस्तस्मै रुद्राय नमो , अस्तु । पुरुषो वै रुद्रस्सन्महो नमो नमः ।

sar’vō vai rud’ras’tas’mai rud’rāya namō , as’tu ।
puruṣhō vai rud’ras’ san’mahō namō namaḥa ।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो , अस्तु ॥४१॥

viśh’vam’ bhūtam’ bhuvanañ’ chit’ram’ bahudhā
jātañ’ jāyamānañ’ cha yate ।
sar’vōh’ hyēṣha rud’ras’tas’mai
rud’rāya namō , as’tu ॥ 41 ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंतमꣳ हृदे ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो , अस्तु ॥४२॥

kad’rud’rāyap’ prachētasē mīḍhuṣh’ṭamāya tav’yasē ।
vōchēma śhan’tamagm’ hṛdē ।
sar’vōh’ hyēṣha rud’ras’tas’mai
rud’rāya namō , as’tu ॥ 42 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥



www.sanatanavedavishwa.com

[KYV TB 3-10-8-4]

ॐ अग्निर्मे वाचि श्रितः । वाग्घृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रम्हणि ।
ॐ ag’nir’mē vāchiśh’ śhritaḥa | vāg’ghṛdayē |
hṛdayam’ mayi | ahamamṛtēē | amṛtam’ bram’haṇi |

वायुर्मे प्राणे श्रितः । प्राणो हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रम्हणि ।
vāyur’mēēp’ praṇēśh’ śhritaḥa | prāṇō hṛdayē |
hṛdayam’ mayi | ahamamṛtēē | amṛtam’ bram’haṇi |

सूर्यो मे चक्षुषि श्रितः । चक्षुर्हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रम्हणि ।
sūr’yō mē chak’ṣhuṣhiśh’ śhritaḥa | chak’ṣhur’hṛdayē |
hṛdayam’ mayi | ahamamṛtēē | amṛtam’ bram’haṇi |

चन्द्रमा मे मनसि श्रितः । मनो हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रम्हणि ।
chan’dramā mē manasiśh’ śhritaḥa | manō hṛdayē |
hṛdayam’ mayi | ahamamṛtēē | amṛtam’ bram’haṇi |

दिशौ मे श्रोत्रे श्रिताः । श्रोत्रꣳ हृदये ।
हृदयं मयि । अहममृते । अमृतं ब्रम्हणि ।
diśhō mēśh’ śhrōt’rēēśh’ śhritā-ḥa | śhrōt’ragm’ hṛdayē |
hṛdayam’ mayi | ahamamṛtēē | amṛtam’ bram’haṇi |

आपो॑ मे॒ रेत॑सि श्रि॒ताः । रेतो॒ हृद॑ये ।
हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रम्ह॑णि ।
āpō mē rētasiśh' śhritā-ḥa | rētō hṛdayē |
hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |

पृ॒थि॒वी मे॒ शरी॑रे श्रि॒ता । शरी॑रꣳ॒ हृद॑ये ।
हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रम्ह॑णि ।
pṛthivī mē śharīrēśh' śhritā | śharīragm' hṛdayē |
hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |

ओ॒ष॒धि॒व॒न॒स्प॒तयो॑ मे॒ लोम॑सु श्रि॒ताः । लोमा॑नि॒ हृद॑ये ।
हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रम्ह॑णि ।
ōṣhadhivanas'patayō mē lōmasuśh' śhritā-ḥa |
lōmāni hṛdayē |
hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |

इन्द्रो॑ मे॒ बले॑ श्रि॒तः । बलꣳ॒ हृद॑ये ।
हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रम्ह॑णि ।
in'drō mē balēēśh' śhritaḥa | balagm' hṛdayē |
hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |

प॒र्जन्यो॑ मे मू॒र्ध्नि श्रि॒तः । मू॒र्धा हृद॑ये ।
हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रम्ह॑णि ।
par'jan'yō mē mūrdh'niśh' śhritaḥa | mūr'dhā hṛdayē |
hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |

www.saivedavishwa.com

ईशानो मे मन्यौ श्रितः । मन्युर्हृदये ।

हृदयं मयि । अहममृतें । अमृतं ब्रम्हणि ।

**īśhānō mē man'yauśh' śhritaḥa | man'yur'hṛdayē |**

**hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |**

आत्मा मं, आत्मनि श्रितः । आत्मा हृदये ।

हृदयं मयि । अहममृतें । अमृतं ब्रम्हणि ।

**āt'mā ma , āt'maniśh' śhritaḥa | āt'mā hṛdayē |**

**hṛdayam' mayi | ahamamṛtēē | amṛtam' bram'haṇi |**

पुनर्मं, आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूतमागात् ।

**punar'ma , āt'mā punarāyurāgāāte |**

**puna[fp]' prāṇa[fp]' punarākūtamāgāāte |**

वैश्वानरो रश्मिभिर्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

**vaiśh'vāanarō raśh'mibhir'vāvṛdhānaḥa |**

**an'tas'tiṣh'ṭhat'vamṛtas'ya gōpā-ḥa ||**

ॐ शान्तिः शान्तिः शान्तिः ॥

**ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||**

www.vedavishwa.com

[KYV TS 4-5]

*Anuvākaḥa 1*

ॐ नमो भगवते॑ रुद्राय ॥

ॐ namō bhagavatē rud’rāya ‖ [as per tradition]

ॐ नम॑स्ते रुद्र म॒न्यव॑ , उ॒तो त॒ , इष॑वे॒ नमः॑ ।
नम॑स्ते , अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नमः॑ ॥ १ ॥

ॐ namas’tē rud’ra man’yava , utō ta , iṣhavē namaḥa ।
namas’tē , as’tu dhan’vanē
bāhubh’yāmuta tē namaḥa ‖ 1 ‖

या त॒ , इषुः॑ शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनुः॑ ।
शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय ॥ २ ॥

yā ta , iṣhuśh’ śhivatamā
śhivam’ babhūva tē dhanuḥu ।
śhivā śharav’yā yā tava tayā nō rud’ra mṛḍaya ‖ 2 ‖

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी ।
तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भि चा॑कशीहि ॥ ३ ॥

yā tē rud’ra śhivā tanūraghōrā (a)pāpakāśhinī ।
tayā nas’tanuvā śhan’tamayā
giriśhan’tābhi chākaśhīhi ‖ 3 ‖

यामिषु॑ङ्गिरिशन्त॒ हस्ते॑ बि॒भर्ष्यस्त॑वे ।
शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हिꣳ॑सीः॒ पुरु॑षं॒ जग॑त् ॥ ४ ॥

yāmiṣhuṅ’ giriśhan’ta has’tē bibhar’ṣhyas’tavē ।
śhivāṅ’ girit’ra tāṅ’ kuru mā
higm’sī[fp]’ puruṣhañ’ jagate ‖ 4 ‖

www.vedavishwa.com

शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑ वदामसि ।
यथा॑ नः॒ सर्व॒मिज्जग॑द् य॒क्ष्मꣳ सु॒मना॒ , अस॑त् ॥५॥

śhivēna vachasāt' tvā giriśhāt'chhā vadāmasi ।
yathā nas' sar'vamij'jagada yak'ṣhmagm'
sumanā , asate ॥ 5 ॥

अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक् ।
अही॒ꣳ॑श्च॒ सर्वा॑ञ्ज॒म्भय॒न्त्सर्वा॑श्च यातु॒धान्य॑ः ॥६॥

adh'yavōchadadhivak'tāp'
prathamō daiv'yō bhiṣhake ।
ahīgeśh'cha sar'vāāñ'jam'bhayant' sar'vāāśh'cha
yātudhān'yaḥa ॥ 6 ॥

अ॒सौ यस्ता॒म्रो , अ॑रु॒ण , उ॒त ब॒भ्रुः सु॑म॒ङ्गल॑ः ।
ये चे॒माꣳरु॒द्रा , अ॒भितो॑ दि॒क्षु श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ꣳहेड॑ , ईमहे ॥७॥

asau yas'tām'rō , aruṇa , uta babh'rus' suman'galaḥa ।
yē chēmāgm'rud'rā , abhitō dik'ṣhuśh' śhritās'
sahas'raśhō (a)vaiṣhāgm'hēḍa , īmahē ॥ 7 ॥

अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः ।
उ॒तैनं॑ गो॒पा , अ॑दृश॒न्नदृ॑शन्नुदहा॒र्य॑ः ।
उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः ॥८॥

asau yō (a)vasar'pati nīlag'rīvō vilōhitaḥa ।
utainan' gōpā , adṛśhan'nadṛśhan'nudahār'yaḥa ।
utainam' viśh'vā bhūtāni sa dṛṣh'ṭō mṛḍayāti naḥa ॥ 8 ॥

नमो॑ , अस्तु नील॑ग्रीवाय सहस्राक्षाय॑ मीढुषे॑॑ ।
अथो॒ ये , अ॑स्य सत्त्वा॑नो॒ऽहं तेभ्यो॑ऽकरं॒ नम॑: ॥९॥

namō , as'tu nīlag'rīvāya sahas'rāk'ṣhāya mīḍhuṣhēē |
athō yē , as'ya sat'tvānō (a)han'
tēbh'yō (a)karan' namaḥa || 9 ||

प्र मु॑ञ्च धन्व॑न॒स्त्वमुभयो॒रार्त्नि॑यो॒र्ज्या॑म् ।
याश्च॑ ते॒ हस्त॒ , इष॑वः पर॒ ता भ॑गवो वप ॥१०॥

pra muñ'cha dhan'vanas' tvamubhayōrārt'niyōrj'yām |
yāsh'cha tē has'ta ,
iṣhava[fp]' parā tā bhagavō vapa || 10 ||

अ॒वतत्त्य॒ धनु॒स्त्वꣳ सह॑स्राक्ष॒ शते॑षुधे ।
नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो न॑: सु॒मना॑ भव ॥११॥

avatat'ya dhanus'tvagm' sahas'rāk'ṣha śhatēṣhudhē |
niśhīr'ya śhal'yānām'
mukhā śhivō nas' sumanā bhava || 11 ||

विज्यं॑ धनु॑: कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ , उ॒त ।
अने॑शन्न॒स्येष॑व , आ॒भुर॑स्य नि॒षङ्ग॒थिः ॥१२॥

vij'yan' dhanu[hk]' kapar'dinō
viśhal'yō bāṇavāgm' , uta |
anēśhan'nas'yēṣhava , ābhuras'ya niṣhaṅ'gathiḥi || 12 ||

या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑: ।

yā tē hētir'mīḍhuṣh'ṭama has'tē babhūva tē dhanuḥu |

तया॒ऽस्मान् - वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज ॥१३॥

tayā (a)s'māne viśh'vatas'tvamayak'ṣhmayā
parib'bhuja || 13 ||

नम॑स्ते , अस्त्वायु॑धायाना॑तताय धृ॒ष्णवे॓ ।
उभाभ्या॑मुत ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने ॥१४॥

namas'tē , ast'vāyudhāyānātatāya dhṛṣh'ṇavēē |
ubhābh'yāmuta tē namō bāhubh'yān'
tava dhan'vanē || 14 ||

परि ते॒ धन्व॑नो हे॒तिर॒स्मान् वृ॑णक्तु वि॒श्वतः॑ ।
अथो॒ य , इ॑षु॒धिस्तवा॒ऽऽरे , अ॒स्मन्नि धे॑हि॒ तम् ॥१५॥

pari tē dhan'vanō hētiras'mān' vṛṇak'tu viśh'vataḥa |
athō ya , iṣhudhis'tavā (ā)rē ,
as'man'ni dhēhi tam || 15 ||

नम॑स्ते , अस्तु भगवन् विश्वेश्व॒राय॑ महादे॒वाय॑ त्र्यम्ब॒काय॑ त्रिपुरान्त॒काय॑
त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑ नीलक॒ण्ठाय॑
मृत्युञ्ज॒याय॑ सर्वेश्व॒राय॑ सदाशि॒वाय॑ श्रीमन्महादे॒वाय॒ नमः॑ ॥

namas'tē , as'tu bhagavan' viśh'vēśh'varāya
mahādēvāyat' tryam'bakāyat' tripurān'takāyat'
trikāg'nikālāya kālāg'nirud'rāya nīlakaṇ'ṭhāya
mṛt'yuñ'jayāya sar'vēśh'varāya sadāśhivāyaśh'
śhrīman' mahādēvāya namaḥa ||

www.saivedavishwa.com

*Anuvākaḥa 2*

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः
प॒शू॒नां पत॑ये॒ नमो॒ नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒ नमो॑
बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये॒ नमो॒

namō hiraṇ'yabāhavē sēnān'yē diśhāñ' cha patayē
namō namō vṛk'ṣhēbh'yō harikēśhēbh'ya[fp]'
paśhūnām' patayē namō namas' sas'piñ'jarāyat'
tviṣhīmatē pathīnām' patayē namō namō
babh'luśhāya viv'yādhinē (a)n'nānām' patayē namō

नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये॒ नमो॒ नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒
पत॑ये॒ नमो॒ नमो॑ रु॒द्राया॑ऽऽतता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ नमः॑
सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒

namō harikēśhāyōpavītinē puṣh'ṭānām' patayē namō
namō bhavas'ya hēt'yai jagatām' patayē namō namō
rud'rāyā (ā)tatāvinēk' kṣhēt'rāṇām' patayē namō
namas' sūtāyāhan'tyāya vanānām' patayē namō

नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒ नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒
कक्षा॑णां॒ पत॑ये॒ नमो॒ नमो॑ भुव॒न्तये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒

namō rōhitāyas' sthapatayē vṛk'ṣhāṇām' patayē namō
namō man'triṇē vāṇijāya kak'ṣhāṇām' patayē namō
namō bhuvan'tayē vārivas'kṛtāyauṣhadhīnām' patayē
namō

नम॑ , उच्चैर्घो॒॑षायाऽऽक्रन्दय॑ते पत्तीनां॒ पत॑ये॒ नमो॒ नम॑ः कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्त्व॑नां॒ पत॑ये॒ नम॑ः ॥

nama , ut'chair'ghōṣhāyāk' (ā)kran'dayatē pat'tīnām' pataye namō nama[hk]' kṛt'snavītāya dhāvatē sat'tvanām' patayē namaḥa ||

*Anuvākaḥa 3*

नम॒ः सह॑मानाय निव्या॒धिन॑ , आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ नम॑ः ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒ नमो॑ निष॒ङ्गिण॑ , इषु॒धिमते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒ नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒

namas' sahamānāya niv'yādhina , āv'yādhinīnām' patayē namō nama[hk]' kakubhāya niṣhaṅ'giṇēēs' stēnānām' patayē namō namō niṣhaṅ'giṇa , iṣhudhimatē tas'karāṇām' patayē namō namō vañ'chatē parivañ'chatēs' stāyūnām' patayē namō

नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒ नम॑ः सृका॒विभ्यो॒ जिघा॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒ नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒ नम॑ , उष्णी॒षिणे॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒

namō nichēravē paricharāyāraṇ'yānām' patayē namō namas' sṛkāvibh'yō jighāgm'sad'bhyō muṣh'ṇatām' patayē namō namō (a)simad'bhyō nak'tañ' charad'bhya[fp]' prakṛn'tānām' patayē namō nama , uṣh'ṇīṣhiṇē giricharāya kuluñ'chānām' patayē namō



www.sanskritweb.net / www.vedavishwa.com

नम॒ , इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒ नम॑ , आतन्वा॒नेभ्यः॑ प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒ नम॑ , आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒ नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमो॒ नम॒ , आसी॑नेभ्यः॒ शया॑नेभ्यश्च वो॒ नमो॒

nama , iṣhumad'bhyō dhan'vāvibh'yaśh'cha vō namō nama , ātan'vānēbh'ya[fp]' pratidadhānēbh'yaśh'cha vō namō nama , āyat'chhad'bhyō visṛjad'bhyaśh'cha vō namō namō (a)s'yad'bhyō vidh'yad'bhyaśh'cha vō namō nama , āsīnēbh'yaśh' śhayānēbh'yaśh'cha vō namō

नमः॑ स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒ नमः॑ स॒भाभ्यः॑ स॒भाप॑तिभ्यश्च वो॒ नमो॒ नमो॒ , अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नमः॑ ॥

namas' svapad'bhyō jāg'rad'bhyaśh'cha vō namō namas'tiṣh'ṭhad'bhyō dhāvad'bhyaśh'cha vō namō namas' sabhābh'yas' sabhāpatibh'yaśh'cha vō namō namō , aśh'vēbh'yō (a)śh'vapatibh'yaśh'cha vō namaḥa ॥

*Anuvākaḥa 4*

नम॑ , आव्या॒धिनी᳚भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒ नम॒ , उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒ नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒

nama , āv'yādhinīībh'yō vividh'yan'tībh'yaśh'cha vō namō nama , ugaṇābh'yas'tṛgm' hatībh'yaśh'cha vō namō namō gṛt'sēbh'yō gṛt'sapatibh'yaśh'cha vō namō

नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒
नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ नमो॑ म॒हद्भ्य॑ः , क्षुल्ल॒केभ्य॑श्च वो॒
नमो॒ नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒ नमो॒ रथे॑भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒

namōv' vrātēēbh'yōv' vrātapatibh'yaśh'cha vō namō
namō gaṇēbh'yō gaṇapatibh'yaśh'cha vō namō
namō virūpēbh'yō viśh'varūpēbh'yaśh'cha vō namō
namō mahad'bhyaḥa , kṣhul'lakēbh'yaśh'cha vō
namō namō rathibh'yō (a)rathēbh'yaśh'cha vō namō
namō rathēēbh'yō rathapatibh'yaśh'cha vō namō

नम॒ः सेना॑भ्यः सेना॒निभ्य॑श्च वो॒ नमो॒ नम॑ः , क्ष॒त्तृभ्य॑ः सङ्ग्रही॒तृभ्य॑श्च वो॒
नमो॒ नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ नम॒ः कुला॑लेभ्यः क॒र्मारे॑भ्यश्च
वो॒ नमो॒

namas' sēnāābh'yas' sēnānibh'yaśh'cha vō namō
namaḥa , kṣhat'tṛbh'yas' saṅg'rahītṛbh'yaśh'cha vō
namō namas'tak'ṣhabh'yō rathakārēbh'yaśh'cha vō
namō nama[hk]' kulālēbh'ya[hk]'
kar'mārēēbh'yaśh'cha vō namō

नम॑ः पुञ्जि॒ष्टे॑भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒ नम॑ , इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒
नमो॒ नमो॑ मृग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नमो॒ नम॒ः श्वभ्य॒ः श्वप॑तिभ्यश्च
वो॒ नम॑ः ॥

nama[fp]' puñ'jiṣh'ṭēēbh'yō niṣhādēbh'yaśh'cha vō
namō nama , iṣhukṛd'bhyō dhan'vakṛd'bhyaśh'cha
vō namō namō mṛgayubh'yaśh' śhvanibh'yaśh'cha
vō namō namaśh' śhvabh'yaśh' śhvapatibh'yaśh'cha
vō namaḥa ||



www.sanskritweb.net www.vedarishwa.com

*Anuvākaḥa 5*

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ नम॑ः श॒र्वाय॑ च पशु॒पत॑ये च॒
नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒
नम॑ः कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ नम॑ः सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒

namō bhavāya cha rud’rāya cha
namaśh’ śhar’vāya cha paśhupatayē cha
namō nīlag’rīvāya cha śhitikaṇ’ṭhāya cha
nama[hk]’ kapar’dinē chav’ vyup’takēśhāya cha
namas’ sahas’rāk’ṣhāya cha śhatadhan’vanē cha

नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒
नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒

namō giriśhāya cha śhipiviṣh’ṭāya cha
namō mīḍhuṣh’ṭamāya chēṣhumatē cha
namōōh’ hras’vāya cha vāmanāya cha
namō bṛhatē cha var’ṣhīyasē cha

नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒ नमो॒ , अग्रि॑याय च प्रथ॒माय॑ च
नम॑ , आ॒शवे॑ चाजि॒राय॑ च॒ नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च
नम॑ , ऊर्म्या॑य चावस्व॒न्या॑य च॒ नम॑ः स्रो॒तस्या॑य च॒ द्वीप्या॑य च ॥

namō vṛd’dhāya cha saṁ’vṛdh’vanē cha
namō , ag’riyāya chap’ prathamāya cha
nama , āśhavē chājirāya cha
namaśh’ śhīgh’riyāya cha śhībh’yāya cha
nama , ūr’myāya chāvas’van’yāya cha
namas’ srōtas’yāya chad’ dvīp’yāya cha ||

www.shivaveda.net www.vedavishwa.com

*Anuvākaḥa 6*

नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒ नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒
नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒ नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय च॒

namōōj' jyēṣh'ṭhāya cha kaniṣh'ṭhāya cha
nama[fp]' pūr'vajāya chāparajāya cha
namō madh'yamāya chāpagal'bhāya cha
namō jaghan'yāya cha budh'niyāya cha

नम॑ः सो॒भ्या॑य च प्रतिस॒र्या॑य च॒ नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒
नम॑ , उ॒र्व॒र्या॑य च॒ खल्या॑य च॒ नम॒ः श्लोक्या॑य चावसा॒न्या॑य च॒

namas' sōbh'yāya chap' pratisar'yāya cha
namō yām'yāya chak' kṣhēm'yāya cha
nama , ur'var'yāya cha khal'yāya cha
namaśh' śhlōk'yāya chāvasān'yāya cha

नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒ नम॑ः श्र॒वाय॑ च प्रति॒श्र॒वाय॑ च॒
नम॑ , आ॒शुषे॑णाय चा॒ऽऽशुर॑थाय च॒ नम॒ः शूरा॑य चावभिन्द॒ते च॒

namō van'yāya cha kak'ṣhyāya cha
namaśh' śhravāya chap' pratiśh'ravāya cha
nama , āśhuṣhēṇāya chā (ā)śhurathāya cha
namaśh' śhūrāya chāvabhin'datē cha

नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒ नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒
नम॑ः श्रु॒ताय॑ च श्रु॒तसे॒नाय॑ च ॥

namō var'minē cha varūthinē cha
namō bil'minē cha kavachinē cha
namaśh' śhrutāya chaśh' śhrutasēnāya cha ||



www.shivedawisdom.com

*Anuvākaḥa 7*

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च
नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च
नमस्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय च सुधन्वने च

namō dun’dubh’yāya chā (ā)hanan’yāya cha
namō dhṛṣh’ṇavē chap’ pramṛśhāya cha
namō dūtāya chap’ prahitāya cha
namō niṣhaṅ’giṇē chēṣhudhimatē cha
namas’tīk’ṣhṇēṣhavē chā (ā)yudhinē cha
namas’ svāyudhāya cha sudhan’vanē cha

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च
नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च
नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च

namas’ srut’yāya cha path’yāya cha
nama[hk]’ kāṭ’yāya cha nīp’yāya cha
namas’ sūd’yāya cha saras’yāya cha
namō nād’yāya cha vaiśhan’tāya cha
nama[hk]’ kūp’yāya chāvaṭ’yāya cha
namō varṣh’yāya chāvarṣh’yāya cha

नमो मेघ्याय च विद्युत्याय च नम , ईध्रियाय चाऽऽतप्याय च
नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥

namō mēgh’yāya cha vid’yut’yāya cha
nama , īdh’riyāya chā (ā)tap’yāya cha
namō vāt’yāya cha rēṣh’miyāya cha
namō vās’tav’yāya cha vās’tupāya cha ||

*Anuvākaḥa 8*

॥ ॐ हर हर हर हर ॐ ॥ नमः॑ सोमा॑य च रु॒द्राय॑ च॒ नम॑स्ता॒म्राय॑
चारु॒णाय॑ च॒ नमः॑ श॒ङ्गाय॑ च पशु॒पत॑ये च॒ नम॑ , उ॒ग्राय॑ च भी॒माय॑ च॒
नमो॑ , अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ ह॒नीय॑से च॒

**॥ ॐ hara hara hara hara ॐ ॥ namas' sōmāya cha**
**rud'rāya cha namas'tām'rāya chāruṇāya cha**
**namaśh' śhaṅ'gāya cha paśhupatayē cha**
**nama , ug'rāya cha bhīmāya cha**
**namō , ag'rēvadhāya cha dūrēvadhāya cha**
**namō han'trē cha hanīyasē cha**

नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॒ नमः॑ श॒म्भवे॑ च मयो॒भवे॑ च॒
नमः॑ शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नमः॑ शि॒वाय॑ च शि॒वत॑राय च॒
नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒ नमः॑ पार्या॑य चावार्या॑य च॒

**namō vṛk'ṣhēbh'yō harikēśhēbh'yō namas'tārāya**
**namaśh' śham'bhavē cha mayōbhavē cha**
**namaśh' śhaṅ'karāya cha mayas'karāya cha**
**namaśh' śhivāya cha śhivatarāya cha**
**namas'tīrth'yāya cha kūl'yāya cha**
**nama[fp]' pār'yāya chāvār'yāya cha**

नमः॑ प्र॒तर॑णाय चो॒त्तर॑णाय च॒ नम॑ , आता॒र्या॑य चाऽऽला॒द्या॑य च॒
नमः॒ शष्प्या॑य च॒ फेन्या॑य च॒ नमः॑ सिक॒त्या॑य च प्रवा॒ह्या॑य च ॥

**nama[fp]' prataraṇāya chōt'taraṇāya cha**
**nama , ātār'yāya chā (ā)lād'yāya cha**
**namaśh' śhaṣh'pyāya cha phēn'yāya cha**
**namas' sikat'yāya chap' pravāh'yāya cha ॥**

*Anuvākaḥa 9*

नम॑ , इरि॒ण्या॑य च प्रप॒थ्या॑य च॒ नम॑ः किꣳशि॒लाय॑ च॒ क्षय॑णाय च॒
नम॑ः कप॒र्दिने॑ च पुल॒स्तये॑ च॒ नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒
नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नम॑ः का॒ट्या॑य च गह्व॒रेष्ठाय॑ च॒

nama , iriṇ'yāya chap' prapath'yāya cha
nama[hk]' kigm'śhilāya chak' kṣhayaṇāya cha
nama[hk]' kapar'dinē cha pulas'tayē cha
namō gōṣh'ṭhyāya cha gṛh'yāya cha
namas'tal'pyāya cha gēh'yāya cha
nama[hk]' kāṭ'yāya cha gah'varēṣh'ṭhāya cha

नमो॑ हृद॒य्या॑य च निवे॒ष्प्या॑य च॒ नम॑ः पाꣳस॒व्या॑य च॒ रज॒स्या॑य च॒
नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒ नमो॒ लोप्या॑य चोल॒प्या॑य च॒

namōōh' hraday'yāya cha nivēṣhp'yāya cha
nama[fp]' pāgm'sav'yāya cha rajas'yāya cha
namaśh' śhuṣh'kyāya cha harit'yāya cha
namō lōp'yāya chōlap'yāya cha

नम॑ , ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒ नम॑ः प॒र्ण्या॑य च पर्णश॒द्या॑य च॒
नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ नम॑ , आक्खिद॒ते च॑ प्रक्खिद॒ते च॒

nama , ūr'vyāya cha sūr'myāya cha
nama[fp]' par'ṇyāya cha par'ṇaśhad'yāya cha
namō (a)paguramāṇāya chābhigh'natē cha
nama , āk'khidatē chap' prak'khidatē cha



www.sriveda.net www.vedavishwa.com

नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विक्षीण॒केभ्यो॒
नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ , आनिर्॒हतेभ्यो॒ नम॑ , आमीव॒त्केभ्य॑ः ॥

namō va[hk]' kirikēbh'yō dēvānāgm' hṛdayēbh'yō
namō vik'ṣhīṇakēbh'yō namō vichin'vat'kēbh'yō
nama , ānir'hatēbh'yō nama , āmīvat'kēbh'yaḥa ||

*Anuvākaḥa 10*

द्रापे॒ , अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित ।
ए॒षां पुरु॑षाणामे॒षां प॑शू॒नां मा भेर्माऽरो॒ मो , ए॑षां॒ किं च॒नाऽऽम॑मत् ॥ १ ॥

drāpē , an'dhasas'patē darid'ran'nīlalōhita |
ēṣhām' puruṣhāṇāmēṣhām' paśhūnām' mā bhēr'mā
(a)rō mō , ēṣhāṅ' kiñ'chanā (ā)mamate || 1 ||

या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑भेषजी ।
शि॒वा रु॒द्रस्य॑ भे॒षजी तया॑ नो मृड जी॒वसे॑ ॥ २ ॥

yā tē rud'ra śhivā tanūśh' śhivā viśh'vāhabhēṣhajī |
śhivā rud'ras'ya bhēṣhajī tayā nō mṛḍa jīvasēē || 2 ||

इमाꣳ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्र भ॑रामहे म॒तिम् ।
यथा॑ नः॒ शमस॑द् द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ , अ॒स्मिन्ननातु॑रम् ॥ ३ ॥

imāgm' rud'rāya tavasē kapar'dinēēk'
kṣhayad'vīrāyap' pra bharāmahē matim |
yathā naśh' śhamasad' dvipadē
chatuṣh'padē viśh'vam' puṣh'ṭaṅ' grāmē ,
as'min'nanāturam || 3 ||



www.shivedanet www.vedavishwa.com

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥४॥

mṛḍā nō rud’rōta nō mayas’kṛdhik’ kṣhayad’vīrāya
namasā vidhēma tē ।
yat’chhañ’ cha yōśh’cha manurāyajē pitā tadaśh’yāma
tava rud’rap’ praṇītau ॥ 4 ॥

मा नो महान्तमुत मा नो , अर्भकं मा न , उक्षन्तमुत मा न , उक्षितम् ।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥५॥

mā nō mahān’tamuta mā nō , ar’bhakam’ mā na ,
uk’ṣhan’tamuta mā na , uk’ṣhitam ।
mā nō vadhī[fp]’ pitaram’ mōta mātaram’ priyā
mā nas’tanuvō rud’ra rīriṣhaḥa ॥ 5 ॥

मानस्तोके तनये मा न , आयुषि मा नो गोषु मा नो , अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर् हविष्मन्तो नमसा विधेम ते ॥६॥

mānas’tōkē tanayē mā na , āyuṣhi mā nō
gōṣhu mā nō , aśh’vēṣhu rīriṣhaḥa ।
vīrān’mā nō rud’ra bhāmitō vadhīr’
haviṣh’man’tō namasā vidhēma tē ॥ 6 ॥

आरात् ते गोघ्न , उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते , अस्तु ।
रक्षा च नो , अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥७॥

ārāt’ tē gōgh’na , uta pūruṣhagh’nēk’ kṣhayad’vīrāya
sum’namas’mē tē , as’tu ।
rak’ṣhā cha nō , adhi cha dēvab’ brūh’yadhā cha naśh’
śhar’ma yat’chhad’ dvibar’hāāḥa ॥ 7 ॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो , अन्यं ते , अस्मन्नि वपन्तु सेनाः ॥८॥

stuhiśh’ śhrutaṅ’ gar’tasadañ’ yuvānam’
mṛgan’ na bhīmamupahat’numug’ram ।
mṛḍā jarit’rē rud’ras’ stavānō , an’yan’ tē ,
as’man’ni vapan’tu sēnāāḥa ॥ 8 ॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥९॥

pariṇō rud’ras’ya hētir’vṛṇak’tu parit’
tvēṣhas’ya dur’matiraghāyō-ḥo ।
avas’ sthirā maghavad’bhyas’tanuṣh’va
mīḍh’vas’tōkāya tanayāya mṛḍaya ॥ 9 ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष , आयुधं निधाय कृत्तिं वसान ,
आ चर पिनाकं बिभ्रदा गहि ॥१०॥

mīḍhuṣh’ṭama śhivatama śhivō nas’ sumanā bhava ।
paramē vṛk’ṣha , āyudhan’ nidhāya kṛt’tiṁ’ vasāna ,
ā chara pinākam’ bibh’radā gahi ॥ 10 ॥

विकिरिद विलोहित नमस्ते , अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥११॥

vikirida vilōhita namas’tē , as’tu bhagavaḥa ।
yās’tē sahas’ragm’ hētayō (a)n’yamas’man’ni
vapan’tu tā-ḥa ॥ 11 ॥

स॒हस्रा॑णि सहस्र॒धा बा॑हु॒वोस्तव॑ हे॒तयः॑ ।
ता॒सा॒मीशा॑नो भगवः परा॒चीना॒ मुखा॑ कृधि ॥१२॥

sahas'rāṇi sahas'radhā bāhuvōs'tava hētayaḥa ।
tāsāmīśhānō bhagava[fp]' parāchīnā mukhā kṛdhi ॥ 12 ॥

*Anuvākaḥa 11*

स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा , अधि॒ भूम्या॑म् ।
तेषाꣳ॑ सहस्र योज॒नेऽव॒ धन्वा॑नि तन्मसि ॥१॥

sahas'rāṇi sahas'raśhō yē rud'rā , adhi bhūm'yāām ।
tēṣhāgm' sahas'ra yōjanē (a)va dhan'vāni tan'masi ॥ 1 ॥

अ॒स्मिन् म॑ह॒त्य॑र्ण॒वे॑ऽन्तरि॑क्षे भ॒वा , अधि॑ ॥२॥
नील॑ग्रीवाः शिति॒कण्ठाः॑ श॒र्वा , अ॒धः , क्ष॑माच॒राः ॥३॥

as'min' mahat'yar'ṇavēē (a)n'tarik'ṣhē bhavā , adhi ॥ 2 ॥
nīlag'rīvāśh' śhitikan'ṭhāāśh' śhar'vā ,
adhaḥa , kṣhamācharā-ḥa ॥ 3 ॥

नील॑ग्रीवाः शिति॒कण्ठा॒ दिवꣳ॑ रु॒द्रा , उप॑श्रिताः ॥४॥
ये वृ॒क्षेषु॑ स॒स्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः ॥५॥
ये भू॒ताना॒मधि॑पतयो विशि॒खासः॑ कप॒र्दिनः॑ ॥६॥

nīlag'rīvāśh' śhitikan'ṭhā
divagm' rud'rā , upaśh'ritā-ḥa ॥ 4 ॥
yē vṛk'ṣhēṣhu sas'piñ'jarā nīlag'rīvā vilōhitā-ḥa ॥ 5 ॥
yē bhūtānāmadhipatayō
viśhikhāsa[hk]' kapar'dinaḥa ॥ 6 ॥

www.vedaaraswa.com

ये , अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥७॥
ये पथां पथि रक्षय , ऐलबृदा यव्युधः ॥८॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥९॥

yē , an'nēṣhu vividh'yan'ti pāt'rēṣhu pibatō janāne ‖ 7 ‖
yē pathām' pathirak' kṣhaya , ailabṛdā yav'yudhaḥa ‖ 8 ‖
yē tīr'thānip' pracharan'ti sṛkāvan'tō niṣhaṅ'ginaḥa ‖ 9 ‖

य , एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्र योजनेऽव धन्वानि तन्मसि ॥१०॥

ya , ētāvan'taśh'cha bhūyāgm'saśh'cha
diśhō rud'rā vitas'thirē ।
tēṣhāgm' sahas'ra yōjanē (a)va dhan'vāni tan'masi ‖ 10 ‖

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो
वर्षम्-इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं
द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥११॥

namō rud'rēbh'yō yē pṛthiv'yāñ' yēē (a)n'tarik'ṣhē yē
divi yēṣhāman'naṁ' vātō var'ṣhamiṣhavas'tēbh'yō
daśhap' prāchīr'daśha dak'ṣhiṇā daśhap'
pratīchīr'daśhōdīchīr' daśhōrdh'vās'tēbh'yō
namas'tē nō mṛḍayan'tu tē yan' dviṣh'mō yaśh'cha
nōd' dvēṣh'ṭi taṁ' vō jam'bhē dadhāmi ‖ 11 ‖

www.salvedavishwa.com

*Rudra Mantras*

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ।

**tryam'bakañ' yajāmahē sugan'dhim'**
**puṣh'ṭivar'dhanam ।**
**ur'vārukamiva ban'dhanān'**
**mṛt'yōr'muk'ṣhīya mā (a)mṛtāāte ।** [KYV TS 1-8-6-10]

यो रुद्रो , अग्नौ यो , अप्सु य , ओषधीषु यो रुद्रो
विश्वाभुवनाऽऽविवेश तस्मै रुद्राय नमो , अस्तु ।

**yō rud'rō , ag'nau yō , ap'su ya , ōṣhadhīṣhu yō rud'rō**
**viśh'vā bhuvanā (ā)vivēśha tas'mai**
**rud'rāya namō , as'tu ।** [KYV TS 5-5-9-3]

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान् - यज्ञस्य मायया सर्वानवयजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा ।

**yē tē sahas'ramayutam' pāśhā mṛt'yō**
**mar'tyāya han'tavē ।**
**tā-ne yaj'ñas'ya māyayā sar'vānavayajāmahē ।**
**mṛt'yavēs' svāhā mṛt'yavēs' svāhāā ।** [KYV TA 10-57&58]

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।
तेनान्नेनाप्यायस्व । नमो रुद्राय विष्णवे मृत्युर्मे पाहि ।

**prāṇānāṅ' gran'thirasi rud'rō mā viśhān'takaḥa ।**
**tēnān'nēnāāp'yāyas'va ।**
**namō rud'rāya viṣh'ṇavē mṛt'yur'mē pāhi ।** [KYV TA 10-75]

www.vedavishwa.com

तमु॑ ष्टु॒हि यः स्वि॒षुः सु॒धन्वा॒यो विश्व॑स्य॒ क्षय॑ति भेष॒जस्य॑ ।
यक्ष्वा॒॑महे सौ॒॑मन॒साय॑ रु॒द्रं नमो॒॑ भिर्दे॒वमसु॑रं दुवस्य ।
अ॒यं मे॒ हस्तो॒ भग॑वान॒यं मे॒ भग॑वत्तरः ।
अ॒यं मे॒॑ वि॒श्व भे॒॑षजो॒ ऽयं शि॒वाभि॑मर्शनः ॥

tamuṣh’ ṣhṭuhi yas’ sviṣhus’ sudhan’vāyō
viśh’vas’yak’ kṣhayati bhēṣhajas’ya ।
yak’ṣhvāāmahē sauūmanasāya rud’ran’ namōō
bhir’dēvamasuran’ duvas’ya । [RV S 5-42-11]
ayam’ mē has’tō bhagavānayam’ mē bhagavat’taraḥa ।
ayam’ mēē viśh’va bhēēṣhajō (a)yaṁ’
śhivābhimar’śhanaḥa ॥ [RV S 10-60-12]

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Śhrī Rudra Chamaka

[KYV TS 4-7]

*Anuvākaḥa 1*

ॐ अग्ना॑ विष्णू स॒जोष॑सेमा व॑र्धन्तु वां॒ गिरः॑ । द्यु॒म्नैर्वाजे॑भि॒रा ग॑तम् ॥
वाज॑श्च मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒ प्रसि॑तिश्च मे धीति॒श्च॑ मे॒ क्रतु॑श्च मे॒
स्वर॑श्च मे॒ श्लोक॑श्च मे श्रा॒वश्च॑ मे॒ श्रुति॑श्च मे॒

ॐ ag’nā viṣh’ṇū sajōṣhasēmā var’dhan’tu vāṅ’ giraḥa ।
dyum’nair’vājēbhirā gatam ॥
vājaśh’cha mēp’ prasavaśh’cha mēp’ prayatiśh’cha
mēp’ prasitiśh’cha mē dhītiśh’cha mēk’ kratuśh’cha
mēs’ svaraśh’cha mēśh’ śhlōkaśh’cha mēśh’
śhrāvaśh’cha mēśh’ śhrutiśh’cha mēj’



www.saivedavishwa.com

ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे
चित्तं च म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे
श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे
जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च
मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥ १ ॥

jyōtiśh'cha mē suvaśh'cha mēp' prāṇaśh'cha mē
(a)pānaśh'cha mēv' vyānaśh'cha mē (a)suśh'cha mē
chit'tañ' cha ma , ādhītañ' cha mē vāk' cha mē
manaśh'cha mē chak'ṣhuśh'cha mēśh'
śhrōt'rañ' cha mē dak'ṣhaśh'cha mē balañ' cha ma ,
ōjaśh'cha mē sahaśh'cha ma , āyuśh'cha mē
jarā cha ma , āt'mā cha mē tanūśh'cha mē
śhar'ma cha mē var'macha mē (a)ṅ'gāni cha mē
(a)s'thāni cha mē parūgm'ṣhi cha mē
śharīrāṇi cha mē || 1 ||

*Anuvākaḥa 2*

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मे
ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च
मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे

jyaiṣh'ṭhyañ' cha ma , ādhipat'yañ' cha mē
man'yuśh'cha mē bhāmaśh'cha mē (a)maśh'cha mē
(a)m'bhaśh'cha mē jēmā cha mē mahimā cha mē
varimā cha mēp' prathimā cha mē varṣh'mā cha mēd'
drāghuyā cha mē vṛd'dhañ' cha mē vṛd'dhiśh'cha mē
sat'yañ' cha mēśh' śhrad'dhā cha mē



www.shivedavishwa.com

जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म , ऋद्धं च म , ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥२॥

jagat'cha mē dhanañ' cha mē vaśhaśh'cha mēt'
tviṣhiśh'cha mēk' krīḍā cha mē mōdaśh'cha mē
jātañ' cha mē janiṣh'yamāṇañ' cha mē
sūk'tañ' cha mē sukṛtañ' cha mē vit'tañ' cha mē
vēd'yañ' cha mē bhūtañ' cha mē bhaviṣh'yat'cha mē
sugañ' cha mē supathañ' cha ma , ṛd'dhañ' cha ma ,
ṛd'dhiśh'cha mē kḷp'tañ' cha mē kḷp'tiśh'cha mē
matiśh'cha mē sumatiśh'cha mē ॥ 2 ॥

*Anuvākaḥa 3*

शं च मे मयश्च मे प्रियं च मे ऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे

śhañ' cha mē mayaśh'cha mēp' priyañ' cha mē
(a)nukāmaśh'cha mē kāmaśh'cha mē
saumanasaśh'cha mē bhad'rañ' cha mēśh'
śhrēyaśh'cha mē vas'yaśh'cha mē yaśhaśh'cha mē
bhagaśh'cha mēd' draviṇañ' cha mē yan'tā cha mē
dhar'tā cha mēk' kṣhēmaśh'cha mē dhṛtiśh'cha mē
viśh'vañ' cha mē mahaśh'cha mē saṁ'vit'cha mēj'

ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म , ऋतं च मे ऽमृतं च मे
ऽयक्ष्मं च मे ऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्रं च मे
ऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥३॥

jñāt’rañ’ cha mē sūśh’cha mēp’ prasūśh’cha mē
sīrañ’ cha mē layaśh’cha ma , ṛtañ’ cha mē
(a)mṛtañ’ cha mē (a)yak’ṣhmañ’ cha mē
(a)nāmayat’cha mē jīvātuśh’cha mē
dīr’ghāyut’vañ’ cha mē (a)namit’rañ’ cha mē
(a)bhayañ’ cha mē sugañ’ cha mē śhayanañ’ cha mē
sūṣhā cha mē sudinañ’ cha mē ॥ 3 ॥

*Anuvākaḥa 4*

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे
सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म , औद्भिद्यं च मे
रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे
भूयश्च मे पूर्णं च मे पूर्णतरं च मे ऽक्षितिश्च मे

ūrk’ cha mē sūnṛtā cha mē payaśh’cha mē
rasaśh’cha mē ghṛtañ’ cha mē madhu cha mē
sag’dhiśh’cha mē sapītiśh’cha mē kṛṣhiśh’cha mē
vṛṣh’ṭiśh’cha mē jait’rañ’ cha ma , aud’bhid’yañ’ cha
mē rayiśh’cha mē rāyaśh’cha mē puṣh’ṭañ’ cha mē
puṣh’ṭiśh’cha mē vibhu cha mēp’ prabhu cha mē
bahu cha mē bhūyaśh’cha mē pūr’ṇañ’ cha mē
pūr’ṇatarañ’ cha mē (a)k’ṣhitiśh’cha mē

कूर्यवाश्च मे ऽन्नं च मे ऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥४॥

kūyavāśh'cha mē (a)n'nañ' cha mē (a)k'ṣhut'cha mēv' vrīhayaśh'cha mē yavāāśh'cha mē māṣhāāśh'cha mē tilāāśh'cha mē mud'gāśh'cha mē khal'vāāśh'cha mē gōdhūmāāśh' cha mē masurāāśh'cha mēp' priyaṅ'gavaśh'cha mē (a)ṇavaśh'cha mēśh' śhyāmākāāśh'cha mē nīvārāāśh'cha mē ‖ 4 ‖

*Anuvākaḥa 5*

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे ऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मे ऽग्निश्च म , आपश्च मे वीरुधश्च म , ओषधयश्च मे कृष्टपच्यं च मे ऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव , आरण्याश्च यज्ञेन कल्पन्तां

aśh'mā cha mē mṛt'tikā cha mē girayaśh'cha mē par'vatāśh'cha mē sikatāśh'cha mē vanas'patayaśh'cha mē hiraṇ'yañ' cha mē (a)yaśh'cha mē sīsañ' cha mēt' trapuśh'cha mēśh' śhyāmañ' cha mē lōhañ' cha mē (a)g'niśh'cha ma , āpaśh'cha mē vīrudhaśh'cha ma , ōṣhadhayaśh'cha mē kṛṣh'ṭapat'chyañ' cha mē (a)kṛṣh'ṭapat'chyañ' cha mēg' grām'yāśh'cha mē paśhava , āraṇ'yāśh'cha yaj'ñēna kal'pan'tāṁ'



www.sanskritweb / www.vedavishwa.com

वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे
कर्मं च मे शक्तिश्च मेऽर्थश्च म , एमश्च म , इतिश्च मे गतिश्च मे ॥५॥

vit'tañ' cha mē vit'tiśh'cha mē bhūtañ' cha mē
bhūtiśh'cha mē vasu cha mē vasatiśh'cha mē
kar'ma cha mē śhak'tiśh'cha mē (a)r'thaśh'cha ma ,
ēmaśh'cha ma , itiśh'cha mē gatiśh'cha mē ‖ 5 ‖

*Anuvākaḥa 6*

अग्निश्च म , इन्द्रश्च मे सोमश्च म , इन्द्रश्च मे सविता च म , इन्द्रश्च मे
सरस्वती च म , इन्द्रश्च मे पूषा च म , इन्द्रश्च मे बृहस्पतिश्च म , इन्द्रश्च
मे मित्रश्च म , इन्द्रश्च मे वरुणश्च म , इन्द्रश्च मे त्वष्टा च म , इन्द्रश्च मे
धाता च म , इन्द्रश्च मे विष्णुश्च म , इन्द्रश्च मेऽश्विनौ च म , इन्द्रश्च मे
मरुतश्च म , इन्द्रश्च मे विश्वे च मे देवा , इन्द्रश्च मे

ag'niśh'cha ma , in'draśh'cha mē sōmaśh'cha ma ,
in'draśh'cha mē savitā cha ma , in'draśh'cha mē
saras'vatī cha ma , in'draśh'cha mē pūṣhā cha ma ,
in'draśh'cha mē bṛhas'patiśh'cha ma ,
in'draśh'cha mē mit'raśh'cha ma , in'draśh'cha mē
varuṇaśh'cha ma , in'draśh'cha mēt'
tvaṣh'ṭā cha ma , in'draśh'cha mē dhātā cha ma ,
in'draśh'cha mē viṣh'ṇuśh'cha ma , in'draśh'cha mē
(a)śh'vinau cha ma , in'draśh'cha mē
marutaśh'cha ma , in'draśh'cha mē
viśh'vē cha mē dēvā , in'draśh'cha mē



www.shivaveda.net www.vedavishwa.com

पृथिवी च म , इन्द्रश्च मे ऽन्तरिक्षं च म , इन्द्रश्च मे द्यौश्च म , इन्द्रश्च मे
दिशश्च म , इन्द्रश्च मे मूर्धा च म , इन्द्रश्च मे प्रजापतिश्च म ,
इन्द्रश्च मे ॥ ६ ॥

pṛthivī cha ma , in’draśh’cha mē (a)n’tarik’ṣhañ’ cha ma ,
in’draśh’cha mēd’ dyauśh’cha ma , in’draśh’cha mē
diśhaśh’cha ma , in’draśh’cha mē mūr’dhā cha ma ,
in’draśh’cha mēp’ prajāpatiśh’cha ma ,
in’draśh’cha mē ॥ 6 ॥

*Anuvākaḥa 7*

अꣳशुश्च मे रश्मिश्च मे ऽदाभ्यश्च मे ऽधिपतिश्च म ,
उपाꣳशुश्च मे ऽन्तर्यामश्च म , ऐन्द्रवायवश्च मे मैत्रावरुणश्च म ,

agm’śhuśh’cha mē raśh’miśh’cha mē
(a)dābh’yaśh’cha mē (a)dhipatiśh’cha ma ,
upāgm’śhuśh’cha mē (a)n’tar’yāmaśh’cha ma ,
ain’dravāyavaśh’cha mē mait’rāvaruṇaśh’cha ma ,

आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म ,
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ,
ऋतुग्रहाश्च मे ऽतिग्राह्याश्च म , ऐन्द्राग्नश्च मे वैश्वदेवश्च मे

āśh’vinaśh’cha mēp’ pratip’ras’thānaśh’cha mē
śhuk’raśh’cha mē man’thī cha ma , āg’rayaṇaśh’cha
mē vaiśh’vadēvaśh’cha mēd’ dhruvaśh’cha mē
vaiśh’vānaraśh’cha ma , ṛtug’rahāśh’cha mē
(a)tig’rāh’yāśh’cha ma , ain’drāg’naśh’cha mē
vaiśh’vadēvaśh’cha mē

www.saiveda.net www.vedavishwa.com

मरुत्वतीयाँश्च मे माहेन्द्रश्च म , आदित्यश्च मे सावित्रश्च मे
सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥७॥

marut'vatīyāāśh'cha mē māhēnd'raśh'cha ma ,
ādit'yaśh'cha mē sāvit'raśh'cha mē
sāras'vataśh'cha mē pauṣh'ṇaśh'cha mē
pāt'nīvataśh'cha mē hāriyōjanaśh'cha mē ॥ 7 ॥

*Anuvākaḥa 8*

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे
चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म , उपरवाश्च मे
ऽधिषवणे च मे द्रोणकलशश्च मे

idh'maśh'cha mē bar'hiśh'cha mē vēdiśh'cha mē
dhiṣh'ṇiyāśh'cha mēs' sruchaśh'cha mē
chamasāśh'cha mēg' grāvāṇaśh'cha mēs'
svaravaśh'cha ma , uparavāśh'cha mē
(a)dhiṣhavaṇē cha mēd' drōṇakalaśhaśh'cha mē

वायव्यानि च मे पूतभृच्च म , आधवनीयश्च म , आग्नीध्रं च मे
हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाँश्च मे पचताश्च मे
ऽवभृथश्च मे स्वगाकारश्च मे ॥८॥

vāyav'yāni cha mē pūtabhṛt'cha ma ,
ādhavanīyaśh'cha ma , āg'nīidh'rañ' cha mē
havir'dhānañ' cha mē gṛhāśh'cha mē sadaśh'cha mē
purōḍāśhāāśh'cha mē pachatāśh'cha mē
(a)vabhṛthaśh'cha mēs' svagākāraśh'cha mē ॥ 8 ॥

www.sanskritweb.net / www.vedavishwa.com

*Anuvākaḥa 9*

अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे

ag'niśh'cha mē ghar'maśh'cha mē (a)r'kaśh'cha mē
sūr'yaśh'cha mēp' prāṇaśh'cha mē
(a)śh'vamēdhaśh'cha mē pṛthivī cha mē
(a)ditiśh'cha mē ditiśh'cha mēd' dyauśh'cha mē
śhak'varīraṅ'gulayō diśhaśh'cha mē

यज्ञेन कल्पन्तामृक् च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म , ऋतुश्च मे व्रतं च मे ऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥९॥

yaj'ñēna kal'pan'tāmṛk' cha mē sāma cha mēs'
stōmaśh'cha mē yajuśh'cha mē dīk'ṣhā cha mē
tapaśh'cha ma , ṛtuśh'cha mēv' vratañ' cha mē
(a)hōrāt'rayōōr' vṛṣh'ṭyā bṛhad'rathan'tarē cha mē
yaj'ñēna kal'pētām || 9 ||

*Anuvākaḥa 10*

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे

gar'bhāāśh'cha mē vat'sāśh'cha mēt' tryaviśh'cha mēt'
tryavī cha mē dit'yavāṭ' cha mē dit'yauhī cha mē
pañ'chāviśh'cha mē pañ'chāvī cha mēt'
trivat'saśh'cha mēt' trivat'sā cha mē

तु॒र्य॒वाट् च॑ मे तु॒र्यौ॒ही च॑ मे पष्ठ॒वाच्च॑ मे पष्ठौ॒ही च॑ म , उ॒क्षा च॑ मे व॒शा च॑ म , ऋष॒भश्च॑ मे वे॒हच्च॑ मे ऽन॒ड् वाच्च॑ मे धे॒नुश्च॑ म॒ , आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पतामपा॒नो य॒ज्ञेन॑ कल्पतां

tur'yavāṭ' cha mē tur'yauhī cha mē paṣh'ṭhavāt'cha mē paṣh'ṭhauhī cha ma , uk'ṣhā cha mē vaśhā cha ma , ṛṣhabhaśh'cha mē vēhat'cha mē (a)naḍ' vāñ'cha mē dhēnuśh'cha ma , āyur' yaj'ñēna kal'patām' prāṇō yaj'ñēna kal'patāmapānō yaj'ñēna kal'patām'

व्या॒नो य॒ज्ञेन॑ कल्पतां॒ चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ꣳ॒ श्रोत्रं॑ य॒ज्ञेन॑ कल्पतां॒ मनो॑ य॒ज्ञेन॑ कल्पतां॒ वाग्य॒ज्ञेन॑ कल्पतामा॒त्मा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ॥ १० ॥

vyānō yaj'ñēna kal'patāñ' chak'ṣhur' yaj'ñēna kal'patāgeśh' śhrōt'rañ' yaj'ñēna kal'patām' manō yaj'ñēna kal'patām' vāg' yaj'ñēna kal'patāmāt'mā yaj'ñēna kal'patāñ' yaj'ñō yaj'ñēna kal'patām || 10 ||

*Anuvākaḥa 11*

एका॑ च मे ति॒स्रश्च॑ मे पञ्च॑ च मे स॒प्त च॑ मे नव॑ च म , एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे॒ नव॑दश च म॒ ,

ēkā cha mē tis'raśh'cha mē pañ'cha cha mē sap'ta cha mē nava cha ma , ēkādaśha cha mēt' trayōdaśha cha mē pañ'chadaśha cha mē sap'tadaśha cha mē navadaśha cha ma ,



www.shivedavishwa.com

एकविंशतिश्च मे त्रयोविंशतिश्च मे पञ्चविंशतिश्च मे सप्तविंशतिश्च मे
नवविंशतिश्च म , एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे

ēkavigm'śhatiśh'cha mēt' trayōvigm'śhatiśh'cha mē
pañ'chavigm'śhatiśh'cha mē sap'tavigm'śhatiśh'cha
mē navavigm'śhatiśh'cha ma , ēkat'rigm'śhat'cha
mēt' trayas'trigm'śhat'cha mē

चतस्रश्च मे ऽष्टौ च मे द्वादश च मे षोडश च मे विंशतिश्च मे
चतुर्विंशतिश्च मे ऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे
चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मे ऽष्टाचत्वारिंशच्च मे

chatas'raśh'cha mē (a)ṣh'ṭau cha mēd' dvādaśha cha mē
ṣhōḍaśha cha mē vigm'śhatiśh'cha mē
chatur'vigm'śhatiśh'cha mē
(a)ṣh'ṭāvigm'śhatiśh'cha mēd' dvāt'rigm'śhat'cha mē
ṣhaṭ'trigm'śhat'cha mē chat'vārigm'śhat'cha mē
chatuśh'chat'vārigm'śhat'cha mē
(a)ṣh'ṭāchat'vārigm'śhat'cha mē

वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च
व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ ११ ॥

vājaśh'chap' prasavaśh'chāpijaśh'chak' kratuśh'cha
suvaśh'cha mūr'dhā chav' vyaśh'niyaśh'chā
(ā)n'tyāyanaśh' chānt'yaśh'cha
bhauvanaśh'cha bhuvanaśh'chādhipatiśh'cha ॥ 11 ॥

*Śhānti Mantra*

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद्विश्वे देवाः
सूक्तवाचः पृथिवि मातर्मा मा हिꣳसीर् मधु मनिष्ये मधु जनिष्ये

iḍā dēvahūr'manur' yaj'ñanīr'
bṛhas'patiruk'thāmadāni śhagm'siṣhad'viśh'vē
dēvās' sūūk'ta vācha[fp]' pṛthivi mātar'mā mā
higm'sīr' madhu maniṣh'yē madhu janiṣh'yē

मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा , अवन्तु शोभायै पितरोऽनु मदन्तु ॥

madhu vak'ṣhyāmi madhu vadiṣh'yāmi madhu matīn'
dēvēbh'yō vāchamud'yāsagm' śhuśh'rūṣhēṇ'yāām'
manuṣh'yēēbh'yas'tam' mā dēvā , avan'tu śhōbhāyai
pitarō (a)nu madan'tu ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Puruṣha Sūktam

[KYV TA 3-12-1 to 3-13-2]
*& [RV S 10-90 ; SYVM 31 ; SYVK 35 ; SV 617 ; AV 19-6]*

ॐ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शं नो , अस्तु द्विपदे । शं चतुष्पदे ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ tat'chhañ'yōrāvṛṇīmahē | gātuñ' yaj'ñāya |
gātuñ' yaj'ñapatayē | daivīīs' svas'tiras'tu naḥa |
svas'tir'mānuṣhēbh'yaḥa | ūr'dhvañ' jigātu bhēṣhajam |
śhan' nō , as'tud' dvipadēē | śhañ' chatuṣh'padē |
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

स॒हस्र॑शीर्॒षा पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑ पात् ।

sahas’raśhīr’ṣhā puruṣhaḥa ǀ

sahas’rāk’ṣhas’ sahas’rapā-te ǀ

स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद् दशाङ्गु॒लम् ॥ १ ॥

sa bhūmiṁ’ viśh’vatō vṛt’vā ǀ

at’yatiṣh’ṭhad’ daśhāṅ’gulam ǁ 1 ǁ

पुरु॑ष , ए॒वेदꣳ सर्वम्॑ । यद् भू॒तं यच्च॒ भव्य॑म् ।

puruṣha , ēvēdagm’ sar’vam’m ǀ

yad’ bhūtañ’ yat’cha bhav’yam’m ǀ

उ॒ताम्‌तत्त्वस्येशा॑नः । यदन्ने॑नाति॒रोह॑ति ॥ २ ॥

utāmṛtat’tvas’yēśhānaḥa ǀ yadan’nēnātirōhati ǁ 2 ǁ

ए॒तावा॑नस्य महि॒मा । अतो॒ ज्याया॑ꣳश्च॒ पूरु॑षः ।

ētāvānas’ya mahimā ǀ atōj’ jyāyāgeśh’cha pūruṣhaḥa ǀ

पादो᳚ऽस्य विश्वा॑ भू॒तानि॑ । त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३ ॥

pādōō (a)s’ya viśh’vā bhūtāni ǀ

tripādas’yāmṛtan’ divi ǁ 3 ǁ

त्रि॒पादू॒र्ध्व , उदैत् पुरु॑षः । पादो᳚ऽस्ये॒हाऽऽभ॑वा॒त्पुनः॑ ।

tripādūr’dhva , udait’ puruṣhaḥa ǀ

pādōō (a)s’yēhā (ā)bhavāt’ punaḥa ǀ

ततो॒ विष्व॒ङ्व्य॑क्रामत् । सा॒श॒ना॒न॒श॒ने , अ॒भि ॥ ४ ॥

tatō viṣh’vaṅ’ vyak’rāmate ǀ

sāśhanānaśhanē , abhi ǁ 4 ǁ

www.sanskritveda.net www.vedavishwa.com

तस्मा॑द् वि॒राड॑जायत । वि॒राजो॒ , अधि॒ पूरु॑षः ।
tas'māād' virāḍajāyata I virājō , adhi pūruṣhaḥa I

स जा॒तो , अत्य॑रिच्यत । प॒श्चाद् भूमि॒मथो॑ पु॒रः ॥५॥
sa jātō , at'yarit'chyata I
paśh'chād' bhūmimathō puraḥa II 5 II

यत् पुरु॑षेण ह॒विषा॑ । दे॒वा य॒ज्ञमत॑न्वत ।
yat' puruṣhēṇa haviṣhāā I
dēvā yaj'ñamatan'vata I

व॒स॒न्तो , अ॑स्यासीदाज्य॒म् । ग्रीष्म , इ॒ध्मः श॒रद्ध॒विः ॥६॥
vasan'tō , as'yā (ā)sīdāj'yam'm I
grīṣh'ma , idh'maśh' śharad'dhaviḥi II 6 II

स॒प्तास्या॑सन्परि॒धयः॑ । त्रिस्स॒प्त स॒मिधः॑ कृ॒ताः ।
sap'tās'yā (ā)san' paridhayaḥa I
tris'sap'ta samidha[hk]' kṛtā-ḥa I

दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥७॥
dēvā yad'yaj'ñan' tan'vānā-ḥa I
abadh'nan' puruṣham' paśhum II 7 II

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न् । पुरु॑षं जा॒तम॑ग्र॒तः ।
tañ' yaj'ñam' bar'hiṣhip' prauk'ṣhan'ne I
puruṣhañ' jātamag'rataḥa I

तेन॑ दे॒वा , अय॑जन्त । सा॒ध्या , ऋष॑यश्च॒ ये ॥८॥
tēna dēvā , ayajan'ta I sādh'yā , ṛṣhayaśh'cha yē II 8 II


www.saiveda.net www.vedavishwa.com

तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॑ः । सम्भृ॑तं पृषद॒ाज्यम् ।
tas’māād’ yaj’ñāt’ sar’vahutaḥa |
sam’bhṛtam’ pṛṣhadāj’yam |

प॒शूꣳस्ताꣳश्च॑क्रे वा॒यव्या॑न् । आ॒र॒ण्यान् ग्रा॒म्याश्च॒ ये ॥९॥
paśhūges’tāgeśh’chak’rē vāyav’yāne |
āraṇ’yān’ grām’yāśh’cha yē || 9 ||

तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॑ः । ऋच॒स्सामा॑नि जज्ञिरे ।
tas’māād’ yaj’ñāt’ sar’vahutaḥa |
ṛchas’ sāmāni jaj’ñirē |

छन्दा॑ꣳसि जज्ञि॒रे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत ॥१०॥
chhan’dāgm’si jaj’ñirē tas’māāte |
yajus’ tas’mādajāyata || 10 ||

तस्मा॒दश्वा॑ , अजायन्त । ये के चो॑भ॒याद॑त॑ः ।
गावो॑ ह जज्ञि॒रे॒ तस्मा॑त् । तस्मा॑ज्जा॒ता॒ , अ॒जा॒वय॑ः ॥११॥
tas’mādaśh’vā , ajāyan’ta | yē kē chōbhayādataḥa |
gāvō ha jaj’ñirē tas’māāte |
tas’māāj’jātā , ajāvayaḥa || 11 ||

यत् पुरु॑षं॒ व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् ।
मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रूपादा॑वुच्ये॒ते ॥१२॥
yat’ puruṣham’ vyadadhuḥu |
katidhāv’ vyakal’payan’ne |
mukhan’ kimas’ya kau bāhū |
kāvūrūpādāvut’chyētē || 12 ||

ब्राम्हणोँऽस्य मुखंमासीत् । बाहू राजन्यंः कृतः ।

brām’haṇōō (a)s’sya mukhamāsī-te |

bāhū rājan’ya[hk]’ kṛtaḥa |

ऊरू तदंस्य यद् वैश्यंः । पद्भ्याँ शूद्रो , अंजायत ॥१३॥

ūrū tadas’ya yad’ vaiś́h’yaḥa |

pad’bhyāgm’ ś́hūd’rō , ajāyata || 13 ||

चन्द्रमा मनंसो जातः । चक्षोस्सूर्यौ , अजायत ।

chand’ramā manasō jātaḥa |

chak’ṣhōs’sūr’yō , ajāyata |

मुखादिन्द्रंश्चाग्निश्च । प्राणाद् वायुरंजायत ॥१४॥

mukhādin’draś́h’chāg’niś́h’cha |

prāṇād’ vāyurajāyata || 14 ||

नाभ्यां , आसीदन्तरिंक्षम् । शीर्ष्णो द्यौस्समंवर्तत ।

nābh’yā , āsīdan’tarik’ṣham |

ś́hīr’ṣhṇōd’ dyaus’samavar’tata |

पद्भ्याम् भूमिर्दिशश्श्रोत्रांत् । तथां लोकाँ , अंकल्पयन् ॥१५॥

pad’bhyām’ bhūmir’ diś́haś́h’ ś́hrōt’rāāte |

tathā lōkāgm’ , akal’payan’ne || 15 ||

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।

vēdāhamētam’ puruṣham’ mahān’tam’m |

ādit’yavar’ṇan’ tamasas’tu pārē |

www.saiveda.net
www.vedavishwa.com

सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑ ।
नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्ते᳚ ॥ १६ ॥

sar'vāṇi rūpāṇi vichit'ya dhīraḥa |
nāmāni kṛt'vā (a)bhivadane yadās'tēē || 16 ||

धा॒ता पु॒रस्ता॒द्यमु॑दाज॒हार॑ । श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः ।
dhātā puras'tād' yamudājahāra |
śhak'ra[fp]' pravid'vān'pradiśhaśh'chatas'raḥa |

तमे॒वं वि॒द्वान॒मृत॑ , इ॒ह भ॑वति । नान्यः पन्था॒ , अय॑नाय विद्यते ॥ १७ ॥
tamēvaṁ' vid'vānamṛta , iha bhavati |
nān'ya[fp]' pan'thā , ayanāya vid'yatē || 17 ||

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
yaj'ñēna yaj'ñamayajan'ta dēvā-ḥa |
tāni dhar'māṇip' prathamān'yāsan'ne |

ते ह॒ नाकं॑ महि॒मान॑ः सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः ॥ १८ ॥
tē ha nākam' mahimānas' sachan'tē |
yat'ra pūr'vē sādh'yās'san'ti dēvā-ḥa || 18 ||

अ॒द्भ्यस्सम्भू॑तः पृथि॒व्यै रसा᳚च्च । वि॒श्वक॑र्मण॒स्सम॑वर्त॒ताधि॑ ।
ad'bhyas'sam'bhūta[fp]' pṛthiv'yai rasāāt'cha |
viśh'vakar'maṇas'samavar'tatādhi |

तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति । तत्पुरु॑षस्य॒ विश्व॒माजा॑न॒मग्रे᳚ ॥ १९ ॥
tas'yat' tvaṣh'ṭā vidadhad'rūpamēti |
tat'puruṣhas'ya viśh'vamājānamag'rēē || 19 ||



www.saiveda.net www.vedavishwa.com

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।
vēdāhamētam’ puruṣham’ mahān’tam’m I
ādit’yavar’ṇan’ tamasa[fp]’ paras’tā-te I

तमेवं विद्वानमृत , इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥२०॥
tamēvaṁ’ vid’vānamṛta , iha bhavati I
nān’ya[fp]’ pan’thā vid’yatē (a)yanāya II 20 II

प्रजापतिश्चरति गर्भे , अन्तः । अजायमानो बहुधा विजायते ।
prajāpatiśh’charati gar’bhē , an’taḥa I
ajāyamānō bahudhā vijāyatē I

तस्य धीराः परिजानन्ति योनिम् ।
मरीचीनां पदमिच्छन्ति वेधसः ॥२१॥
tas’ya dhīrā[fp]’ parijānan’ti yōnim’m I
marīchīnām’ padamit’chhan’ti vēdhasaḥa II 21 II

यो देवेभ्य , आतपति । यो देवानां पुरोहितः ।
yō dēvēbh’ya , ātapati I yō dēvānāām’ purōhitaḥa I

पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राम्हये ॥२२॥
pūr’vō yō dēvēbh’yō jātaḥa I
namō ruchāyab’ brām’hayē II 22 II

रुचं ब्राम्हं जनयन्तः । देवा , अग्रे तदब्रुवन् ।
rucham’ brām’hañ’ janayan’taḥa I
dēvā , ag’rē tadab’ruvan’ne I

www.saiveda.net www.vedavishwa.com

यस्त्वैवं ब्रांम्हणो विद्यात् । तस्यं देवा , असन्वशें ॥२३॥

yas’tvaivam’ braām’haṇō vid’yā-te ।

tas’ya dēvā , asan’ vaśhēē ॥ 23 ॥

ह्रीश्चं ते लक्ष्मीश्च पत्न्यौं । अहोरात्रे पार्श्वे ।

hrīśh’cha tē lak’ṣhmīśh’cha pat’nyauu ।

ahōrāt’rē pār’śhvē ।

नक्षंत्राणि रूपम् । अश्विनौं व्यात्तम् ।

nak’ṣhat’rāṇi rūpam । aśh’vinauv’ vyāt’tam’m ।

इष्टं मंनिषाण । अमुं मंनिषाण ।

सर्वं मनिषाण ॥२४॥ (तच्छंयोरावृंणीमहे…)

iṣh’ṭam’ maniṣhāṇa । amum’ maniṣhāṇa ।

sar’vam’ maniṣhāṇa ॥ 24 ॥ (tat’chhañ’ yōrāvṛṇīmahē…)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Nārāyaṇa Sūktam

[KYV TA 4-10-13]

ॐ धाता पुरस्ताद् यमुंदाजहारं । शक्रः प्रविद्वान्प्रदिशश्चतंस्त्रः ।

ॐ dhātā puras’tād’ yamudājahāra ।

śhak’ra[fp]’ pravid’vān’pradiśhaśh’chatas’raḥa ।

तमेवं विद्वानमृतं , इह भंवति । नान्यः पन्था , अयंनाय विद्यते ।

tamēvam’ vid’vānamṛta , iha bhavati ।

nān’ya[fp]’ pan’thā , ayanāya vid’yatē ।



www.saiveda.net www.vedavishwa.com

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥ १ ॥

sahas'raśhīr'ṣhan' dēvaṁ' viśh'vāk'ṣhaṁ'
viśh'vaśham'bhuvam ǀ
viśh'van' nārāyaṇan' dēvamak'ṣharam'
paramam' padam ǁ 1 ǁ

विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ २ ॥

viśh'vata[fp]' paramān'nit'yaṁ'
viśh'van' nārāyaṇagm' harim ǀ
viśh'vamēvēdam' puruṣhas'tad'viśh'vamupajīvati ǁ 2 ǁ

पतिं विश्वस्याऽऽत्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ ३ ॥

patiṁ' viśh'vas'yā (ā)t'mēśh'varagm'
śhāśh'vatagm' śhivamat'chyutam ǀ
nārāyaṇam' mahāj'ñēyaṁ'
viśh'vāt'mānam' parāyaṇam ǁ 3 ǁ

नारायण परो ज्योतिरात्मा नारायणः परः ।
नारायणपरं ब्रम्ह तत्त्वं नारायणः परः ॥ ४ ॥

nārāyaṇa parōj' jyōtirāt'mā nārāyaṇa[fp]' paraḥa ǀ
nārāyaṇa param' bram'ha tat'tvan'
nārāyaṇa[fp]' paraḥa ǁ 4 ǁ

www.sanskritvedavishwa.com

नारायण परो ध्याता ध्यानं नारायणः परः ।
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥५॥

nārāyaṇa parōd' dhyātād'
dhyānan' nārāyaṇa[fp]' paraḥa ।
yat'cha kiñ'chij' jagat'sar'van'
dṛśh'yatēēśh' śhrūyatē (a)pi vā ॥ 5 ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् ॥६॥

an'tar'bahiśh'cha tat' sar'vaṁ'
vyāp'ya nārāyaṇas' sthitaḥa ।
anan'tamav'yayaṅ' kavigm'
samud'rē (a)n'taṁ' viśh'va śham'bhuvam ॥ 6 ॥

पद्मकोश प्रतीकाशꣳ हृदयं चाप्यधोमुखम् ।
अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ॥७॥

pad'makōśhap' pratīkāśhagm'
hṛdayañ' chāp'yadhōmukham ।
adhō niṣh'ṭyā vitas'tyān'tē
nābh'yāmupari tiṣh'ṭhati ॥ 7 ॥

ज्वालमालाकुलं भाती विश्वस्याऽऽयतनं महत् ।
सन्ततꣳ शिलाभिस्तुलम्बत्याकोशसन्निभम् ॥८॥

jvālamālākulam' bhātī viśh'vas'yāyatanam' mahate ।
san'tatagm' śhilābhis'tu
lam'bat'yākōśhasan'nibham ॥ 8 ॥



www.sanskritvedavishwa.com

तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्न्थ्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ॥९॥

tas'yān'tē suṣhiragm' sūk'ṣhman'
tas'min'n'thsar'vam' pratiṣh'ṭhitam ।
tas'ya madh'yē mahānag'nir'
viśh'vār'chir'viśh'vatōmukhaḥa ॥ 9 ॥

सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः ।
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता ॥१०॥

sō (a)g'rabhug'vibhajan'tiṣh'ṭhan'
nāhāramajara[hk]' kaviḥi ।
tir'yagūrdh'vamadhaśh'śhāyī
raśh'mayas'tas'ya san'tatā ॥ 10 ॥

सन्तापयति स्वं देहमापादतलमस्तकः ।
तस्य मध्ये वह्निशिखा , अणीयोर्ध्वा व्यवस्थितः ॥११॥

san'tāpayatis' svan' dēhamāpādatalamas'takaḥa ।
tas'ya madh'yē van'hiśhikhā ,
aṇīyōōrdh'vāv' vyavas'thitaḥa ॥ 11 ॥

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥१२॥

nīlatōyada madh'yas'thād' vid'yul'lēkhēva bhās'varā ।
nīvāraśhūkavat'tan'vī pītā bhāās'vat'yaṇūpamā ॥ 12 ॥

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रम्ह स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥१३॥

tas'yāāśh' śhikhāyā madh'yē
paramāāt'māv' vyavas'thitaḥa ǀ
sab' bram'ha sa śhivas' sa haris' sēn'dras'
sō (a)k'ṣhara[fp]' paramas' svarā-ṭe ǁ 13 ǁ

ऋतꣳ सत्यं परं ब्रम्ह पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥१४॥

ṛtagm' sat'yam' param'
bram'ha purușhaṅ' kṛṣh'ṇapiṅ'galam ǀ
ūr'dhvarētaṁ' virūpāk'ṣhaṁ'
viśh'varūpāya vai namō namaḥa ǁ 14 ǁ

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥१५॥

nārāyaṇāya vid'mahē vāsudēvāya dhīmahi ǀ
tan'nō viṣh'ṇu[fp]' prachōdayāāte ǁ 15 ǁ

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ǁ

www.saivedavishwa.com

# Nārāyaṇa Upaniṣhat

[as per tradition]

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ saha nāvavatu | saha nau bhunak'tu |
saha vīr'yaṅ'karavāvahai |
tējas'vināvadhītamas'tu mā vid'viṣhāvahaiī ||

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति ।
नारायणात् प्राणो जायते । मनः सर्वेन्द्रियाणि च ।

ॐ atha puruṣhō ha vai
nārāyaṇō (a)kāmayatap' prajās' sṛjēyēti |
nārāyaṇāt' prāṇō jāyatē | manas' sar'vēn'driyāṇi cha |

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।
नारायणाद् ब्रम्हा जायते । नारायणाद् रुद्रो जायते ।

khaṁ' vāyur'jyōtirāpa[fp]' pṛthivī viśh'vas'ya dhāriṇī |
nārāyaṇād' bram'hā jāyatē | nārāyaṇād' rud'rō jāyatē |

नारायणादिन्द्रो जायते । नारायणात् प्रजापतयः प्रजायन्ते ।
नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि च छन्दाꣳसि ।

nārāyaṇādin'drō jāyatē |
nārāyaṇāt' prajāpataya[fp]' prajāyan'tē |
nārāyaṇād' dvādaśhādit'yā
rud'rā vasavas' sar'vāṇi cha chhan'dāgm'si |

नारायणादेव समुत्पद्यन्ते । नारायणे प्रवर्तन्ते । नारायणे प्रलीयन्ते ॥ १ ॥

nārāyaṇādēva samut'pad'yan'tē ।
nārāyaṇēp' pravar'tan'tē । nārāyaṇēp' pralīyan'tē ॥ 1 ॥

ॐ । अथ नित्यो नारायणः । ब्रम्हा नारायणः ।
शिवश्च नारायणः । शक्रश्च नारायणः ।

ॐ । atha nit'yō nārāyaṇaḥa । bram'hā nārāyaṇaḥa ।
śhivaśh'cha nārāyaṇaḥa । śhak'raśh'cha nārāyaṇaḥa ।

द्यावापृथिव्यौ च नारायणः । कालश्च नारायणः ।
दिशश्च नारायणः । ऊर्ध्वश्च नारायणः ।

dyāvāpṛthiv'yau cha nārāyaṇaḥa ।
kālaśh'cha nārāyaṇaḥa । diśhaśh'cha nārāyaṇaḥa ।
ūr'dhvaśh'cha nārāyaṇaḥa ।

अधश्च नारायणः । अन्तर्बहिश्च नारायणः ।
नारायण , एवेदꣳ सर्वम् । यद् भूतं यच्च भव्यम् ।

adhaśh'cha nārāyaṇaḥa ।
an'tar'bahiśh'cha nārāyaṇaḥa ।
nārāyaṇa , ēvēdagm' sar'vam ।
yad' bhūtañ' yat'cha bhav'yam'm ।

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव , एको नारायणः ।
niṣh'kalō nirañ'janō nir'vikal'pō nirākh'yātaśh'
śhud'dhō dēva , ēkō nārāyaṇaḥa ।



www.salvedaviswa.com

न द्वितीयोँऽस्ति कश्चित् । य , एवं वेद ।
स विष्णुरेव भवति स विष्णुरेव भवति ॥२॥

nad’ dvitīyōō (a)s’ti kaśh’chite । ya , ēvaṁ’ vēda ।
sa viṣh’ṇurēva bhavati sa viṣh’ṇurēva bhavati ॥ 2 ॥

ओमित्यग्रे व्याहरेत् । नम , इति पश्चात् । नारायणायेत्युपरिष्टात् ।
ōmit’yag’rēv’ vyāharē-te । nama , iti paśh’chā-te ।
nārāyaṇāyēt’yupariṣh’ṭā-te ।

ओमित्येकाक्षरम् । नम , इति द्वे , अक्षरे । नारायणायेति पञ्चाक्षराणि ।
ōmit’yēkāk’ṣharam । nama , itid’ dvē , ak’ṣharē ।
nārāyaṇāyēti pañ’chāāk’ṣharāṇi ।

एतद् वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति ।
ētad’ vai nārāyaṇas’yāṣh’ṭāk’ṣharam’ padam ।
yō ha vai nārāyaṇas’yāṣh’ṭāk’ṣharam’ padamadh’yēti ।

अनपब्रुवस्सर्वमायुरेति । विन्दते प्राजापत्यꣳ रायस्पोषं गौपत्यम् ।
anapab’ruvas’sar’vamāyurēti ।
vin’datēp’ prājāpat’yagm’ rāyas’pōṣhaṅ’gaupat’yam ।

ततोऽमृतत्त्वमश्नुते ततोऽमृतत्त्वमश्नुत , इति । य , एवं वेद ॥३॥
tatō (a)mṛtat’vamaśh’nutē tatō
(a)mṛtat’vamaśh’nuta , iti । ya , ēvaṁ’ vēda ॥ 3 ॥

प्रत्यगानन्दं ब्रम्ह पुरुषं प्रणवंस्वरूपम् ।
prat’yagānan’dam’ bram’ha
puruṣham’ praṇavas’varūpam ।



www.shivaveda.net www.vedavishwa.com

अकार , उकार मकार , इति । ताऽनेकधा समभरत् तदेतदोमिति ।
यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् ।

**akāra , ukāra makāra , iti |**
**tā (a)nēkadhā samabharat' tadētadōmiti |**
**yamuk'tvā mut'chyatē yōgī**
**jan'masaṁ'sāraban'dhanā-te |**

ॐ नमो नारायणायेति मन्त्रोपासकः ।

**ॐ namō nārāyaṇāyēti man'trōpāsakaḥa |**

वैकुण्ठभुवनलोकं गमिष्यति । तदिदं परं पुण्डरीकं विज्ञान घनम् ।
तस्मात् तदिदावन्मात्रम् । ब्रम्हण्यो देवकीपुत्रो ब्रम्हण्यो मधुसूदनोम् ।

**vaikuṇ'ṭhabhuvanalōkaṅ' gamiṣh'yati |**
**tadidam' param' puṇ'ḍarīkaṁ' vij'ñāna ghanam |**
**tas'māt' tadidāvan'māt'ram |**
**bram'haṇ'yō dēvakīput'rōb'**
**bram'haṇ'yō madhusūdanōm |**

सर्वभूतस्थमेकं नारायणम् । कारण रूपमकार परब्रम्होम् ।
एतदथर्व शिरोयोऽधीते ।

**sar'vabhūtas'thamēkan' nārāyaṇam |**
**kāraṇa rūpamakāra parab'ram'hōm |**
**ētadathar'va śhirōyō (a)dhītē |**

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायमधीयानो दिवसकृतं पापं नाशयति ।

**prātaradhīyānō rāt'rikṛtam' pāpan' nāśhayati |**
**sāyamadhīyānō divasakṛtam' pāpan' nāśhayati |**

www.salvedanet www.vedavishwa.com

माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात् प्रमुच्यते ।
सर्व वेद पारायण पुण्यं लभते ।

mādh’yan’dinamādit’yābhimukhō (a)dhīyāna[fp]’
pañ’chapātakōpapātakāt’ pramuch’yatē ।
sar’va vēda pārāyaṇa puṇ’yaṁ’ labhatē ।

नारायण सायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति ।
य , एवं वेद । इत्युपनिषत् ॥५॥ (सह नाववतु…)

nārāyaṇa sāyuj’yamavāp’nōti
nārāyaṇa sāyuj’yamavāp’nōti ।
ya , ēvaṁ’ vēda । it’yupaniṣhate ॥ 5 ॥ (saha nāvavatu…)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

## Śhraddhā Sūktam

[KYV TB 2-8-8-6]

ॐ श्रद्धयाऽग्निः समिध्यते । श्रद्धया विन्दते हविः । श्रद्धां भगस्य मूर्धनि ।

ॐ śhrad’dhayā (a)g’nis’ samidh’yatē ।
śhrad’dhayā vin’datē haviḥi ।
śhrad’dhām’ bhagas’ya mūr’dhani ।

वचसाऽऽवेदयामसि । प्रियङ्ग् श्रद्धे ददतः । प्रियङ्ग् श्रद्धे दिदासतः ।

vachasā (ā)vēdayāmasi ।
priyag’geśh’ śhrad’dhē dadataḥa ।
priyag’geśh’ śhrad’dhē didāsataḥa ।



www.sanskritdocuments / www.vedavishwa.com

प्रि॒यं भो॒जेषु॒ यज्व॑सु । इ॒दं म॑ , उदि॒तं कृ॑धि । यथा॑ दे॒वा , असु॑रेषु ।

priyam' bhōjēṣhu yaj'vasu ।
idam' ma , uditaṅ' kṛdhi । yathā dēvā , asurēṣhu ।

श्र॒द्धामु॒ग्रेषु॑ च॒क्रि॒रे । ए॒वं भो॒जेषु॒ यज्व॑सु । अ॒स्माक॑मुदि॒तं कृ॑धि ।

śhrad'dhāmug'rēṣhu chak'rirē ।
ēvam' bhōjēṣhu yaj'vasu । as'mākamuditaṅ' kṛdhi ।

श्र॒द्धां दे॒वा यज॑मानाः । वा॒युगो॑पा , उपा॑सते । श्र॒द्धाꣳ हृ॒दय्य॑याऽऽकू॑त्या ।

śhrad'dhān' dēvā yajamānā-ḥa । vāyugōpā , upāsatē ।
śhrad'dhāgm' hṛday'yayā (ā)kūūt'yā ।

श्र॒द्धया॑ हूयते ह॒विः । श्र॒द्धां प्रा॒तर्ह॑वामहे । श्र॒द्धां म॒ध्यंदि॑नं॒ परि॑ ।

śhrad'dhayā hūyatē haviḥi ।
śhrad'dhām' prātar'havāmahē ।
śhrad'dhām' madh'yan'dinam' pari ।

श्र॒द्धाꣳ सूर्य॑स्य नि॒म्रुचि॑ । श्रद्धे॒ श्रद्धा॑पये॒ह मा॑ । श्र॒द्धा दे॒वानधि॑वस्ते ।

śhrad'dhāgm' sūr'yas'ya nim'ruchi ।
śhrad'dhēśh' śhrad'dhāpayēha māā ।
śhrad'dhā dēvānadhivas'tē ।

श्र॒द्धा विश्व॑मि॒दं जग॑त् । श्र॒द्धां काम॑स्य मा॒तर॑म् । ह॒विषा॑ वर्धयामसि ।

śhrad'dhā viśh'vamidañ' jagate ।
śhrad'dhāṅ' kāmas'ya mātaram'm ।
haviṣhā var'dhayāmasi ।

ॐ शान्ति॒ः शान्ति॒ः शान्तिः॑ ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

## Dūrvā Sūktam

[KYV TA 10-1-7&8]

ॐ स॒ह॒स्र॒प॑र॒मा दे॒वी श॒तमू॑ला श॒ताङ्कु॑रा ।
सर्व॑ꣳ हर॑तु मे पा॒पं दू॒र्वा दु॑स्स्वप्न॒नाश॑नी ॥१॥

ॐ **sahas'rapa^ra^mā dēvī śhata^mū^lā śhatāṅ'^ku^rā |**
**sar'va^gm'^ hara^tu^ mē pāpan'**
**dūr'vā ^dus'^svap'na nā^śha^nī || 1 ||**

काण्डा॑त्काण्डात् प्र॒रोह॑न्ती॒ परु॑षः परुषः॒ परि॑ ।
ए॒वानो॑ दूर्वे॒ प्रत॑नु स॒हस्रे॑ण श॒तेन॑ च ॥२॥

**kāṇ'ḍā^at'^kāṇ'ḍāt' prarō^han'^tī**
**pa^ru^ṣha[fp]' paruṣha[fp]' pa^ri^ |**
**ēvā^nō^ dūr'vēp' pra^ta^nu sahas'^rē^ṇa śhatē^na^ cha || 2 ||**

या श॒तेन॑ प्रत॒नोषि॑ स॒हस्रे॑ण वि॒रोह॑सि ।
तस्या॑स्ते देवीष्टके वि॒धेम॑ ह॒विषा॑ व॒यम् ॥३॥

**yā śhatē^nap'^ pratanō^ṣhi^ sahas'^rē^ṇa virō^ha^si |**
**tas'yā^as'^tē dēvīṣh'ṭakē vidhē^ma^ haviṣ^hā^ vayam || 3 ||**

अ॒श्व॒क्रा॒न्ते र॑थक्रा॒न्ते वि॒ष्णु॒क्रा॑न्ते व॒सुन्ध॑रा ।
शिर॑सा धार॑यिष्यामि र॒क्षस्व॒ मां॑ प॒दे प॑दे ॥४॥

**aśh'^vak'^rān'tē ^ra^thak'rān'tē**
**viṣh'ṇuk'rā^ān'^tē vasun'^dha^rā |**
**śhira^sā^ dhā^ra^yiṣh'yāmi**
**rak'ṣhas'va mā^ām'^ padēpadē || 4 ||**

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ **śhā-n'tiśh' śhā-n'tiśh' śhā-n'^ti^ḥi ||**

## Durgā Sūktam

[KYV TA 10-2-1]

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेवसिन्धुं दुरिताऽत्यग्निः ॥१॥

ॐ jātavēdasē sunavāma sōmamarātīyatō
nidahāti vēdaḥa ।
sa na[fp]’ par’ṣhadati dur’gāṇi viśh’vā
nāvēvasin’dhun’ duritā (a)t’yag’niḥi ॥ 1 ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाँ ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥२॥

tāmag’nivar’ṇān’ tapasāj’ jvalan’tīṁ’
vairōchanīṅ’ kar’maphalēṣhu juṣh’ṭāām ।
dur’gān’ dēvīgm’ śharaṇamaham’
prapad’yē sutarasi tarasē namaḥa ॥ 2 ॥

अग्ने त्वं पारया नव्यो , अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न , उर्वी भवा तोकाय तनयाय शंयोः ॥३॥

ag’nēt’ tvam’ pāraya nav’yō ,
as’mānth’svas’tibhirati dur’gāṇi viśh’vāā ।
pūśh’cha pṛth’vī bahulā na ,
ur’vī bhavā tōkāya tanayāya śhañ’yō-ḥo ॥ 3 ॥

विश्वानिनो दुर्गहा जातवेदस् सिन्धुं न नावा स्दुरिताऽतिपर्षि ।
अग्ने , अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥४॥

viśh’vāninō dur’gahā jātavēdas’
sin’dhun’ na nāvā duritā (a)tipar’ṣhi ।
ag’nē , at’rivan’manasā gṛṇānōō (a)s’mākam’
bōdh’yavitā tanūnāām ॥ 4 ॥



www.vedavishwa.com

पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो , अतिदुरिताऽत्यग्निः ॥५॥

pṛtanājitagm' sahamānamug'ramag'nigm'
huvēma paramāt'sadhas'thāāte ।
sa na[fp]' par'ṣhadati dur'gāṇi viśh'vāk'
kṣhāmad'dēvō , ati duritā (a)t'yag'niḥi ॥ 5 ॥

प्रत्नोषि कमीड्यो , अध्वरेषु सनाच्च होता नव्यश्चसत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥६॥

prat'nōṣhi kamīḍ'yō , adh'varēṣhu
sanāt'cha hōtā nav'yaśh'chasat'si ।
svāñ' chāāg'nē tanuvam' pip'rayas'vās'mabh'yañ'
cha saubhagamāyajas'va ॥ 6 ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक , इह मादयन्ताम् ॥७॥

gōbhir'juṣh'ṭamayujō niṣhik'tan'
tavēēn'dra viṣh'ṇōranusañ'charēma ।
nākas'ya pṛṣh'ṭhamabhi saṁ'vasānō
vaiṣh'ṇavīṁ' lōka , iha mādayan'tām ॥ 7 ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥८॥

kāt'yāyanāya vid'mahē kan'yakumāri dhīmahi ।
tan'nō dur'gi[fp]' prachōdayāāte ॥ 8 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥



www.vedaviswa.com

[KYV TA 10-2-1]

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात्सं बभूव ।

ॐ yaśh'chhan'dasāmṛṣhabhō viśh'varūpaḥa ।
chhan'dōbh'yō (a)dh'yamṛtāāt'sam' babhūva ।

स मेन्द्रो मेधयाँ स्पृणोतु । अमृतस्य देव धारणो भूयासम् ।

sa mēn'drō mēdhayāās' spṛṇōtu ।
amṛtas'ya dēva dhāraṇō bhūyāsam ।

शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् ।

śharīram' mē vichar'ṣhaṇam ।
jih'vā mē madhumat'tamā ।
kar'ṇāābh'yām' bhūri viśh'ruvam ।

ब्रह्मणः कोशोऽसि मेधयाऽपिहितः । श्रुतं मे गोपाय ।

bram'haṇa[hk]' kōśhō (a)si mēdhayā (a)pihitaḥa ।
śhrutam' mē gōpāya ।

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

मेधादेवी जुषमाणा न , आगाद्विश्वाची भद्रा सुमनस्य माना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥

mēdhādēvī juṣhamāṇā na ,
āgāād'viśh'vāchī bhad'rā sumanas'ya mānā ।
tvayā juṣh'ṭā nudamānā duruk'tāān'
bṛhad'vadēma vidathē suvīrāāḥa ॥

त्वया जुष्ट , ऋषिर्भवति देवि त्वया ब्रम्हाऽऽगतश्रीरुत त्वया ।
त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥

**tvayā juṣh’ṭa , ṛṣhir’bhavati dēvit’ tvayāb’**
**bram’hā (ā)gataśh’rīrutat’ tvayāā ।**
**tvayā juṣh’ṭaśh’chit’raṁ’ vin’datē vasu sānō**
**juṣhas’vad’ draviṇō na mēdhē ॥**

मेधां म , इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे , अश्विनावुभावाधत्तां पुष्करस्त्रजा ॥

**mēdhām’ ma , in’drō dadātu mēdhān’ dēvī saras’vatī ।**
**mēdhām’ mē , aśh’vināvubhāvādhat’tām’**
**puṣh’karas’rajā ॥**

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताꣳस्वाहा ॥

**ap’sarāsu cha yā mēdhā**
**gan’dhar’vēṣhu cha yan’manaḥa ।**
**daivīīm’ mēdhā saras’vatī sā māām’**
**mēdhā surabhir’ juṣhatāges’ svāhāā ॥**

आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥

**ā māām’ mēdhā surabhir’ viśh’varūpā**
**hiraṇ’yavar’ṇā jagatī jagam’yā ।**
**ūr’jas’vatī payasā pin’vamānā sā māām’**
**mēdhā sup’ratīkā juṣhan’tām ॥**

मयि॑ मे॒धां मयि॑ प्र॒जां मय्य॒ग्निस्तेजो॑ दधातु मयि॑ मे॒धां मयि॑ प्र॒जां मयीन्द्र॑ ,
इन्द्रि॒यन्द॑धातु मयि॑ मे॒धां मयि॑ प्र॒जां मयि॒ सूर्यो॒ भ्राजो॑ दधातु ॥

mayi mēdhām' mayip' prajām' may'yag'nis'tējō
dadhātu mayi mēdhām' mayip' prajām'
mayīn'dra , in'driyan' dadhātu mayi mēdhām'
mayip' prajām' mayi sūr'yōb' bhrājō dadhātu ||

हं॒स हं॒साय॑ वि॒द्महे॑ परमहं॒साय॑ धीमहि । तन्नो॑ हंसः प्रचो॒दया॑॑त् ॥

ham'sa ham'sāya vid'mahē paramaham'sāya dhīmahi |
tan'nō ham'sa[fp]' prachōdayāāte ||

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Sarva Dēvatā Gāyatrī

[KYV TA 10-1-5 to 10-1-7]

ॐ पुरु॑षस्य विद्म सहस्रा॒क्षस्य॑ महा॒देवस्य॑ धीमहि ।
तन्नो॑ रुद्रः प्रचो॒दया॑॑त् ॥ १ ॥

ॐ purushas'ya vid'ma
sahas'rāk'shas'ya mahādēvas'ya dhīmahi |
tan'nō rud'ra[fp]' prachōdayāāte || 1 ||

तत्पुरु॑षाय वि॒द्महे॑ महा॒देवाय॑ धीमहि । तन्नो॑ रुद्रः प्रचो॒दया॑॑त् ॥ २ ॥

tat'purushāya vid'mahē mahādēvāya dhīmahi |
tan'nō rud'ra[fp]' prachōdayāāte || 2 ||

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥३॥

tat'purushāya vid'mahē vak'ratuṇ'ḍāya dhīmahi |
tan'nō dan'ti[fp]' prachōdayāāte || 3 ||

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् ॥४॥

tat'purushāya vid'mahē chak'ratuṇ'ḍāya dhīmahi |
tan'nō nan'di[fp]' prachōdayāāte || 4 ||

तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नष्षण्मुखः प्रचोदयात् ॥५॥

tat'purushāya vid'mahē mahāsēnāya dhīmahi |
tan'nash'shan'mukha[fp]' prachōdayāāte || 5 ||

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् ॥६॥

tat'purushāya vid'mahē suvar'ṇapak'shāya dhīmahi |
tan'nō garuḍa[fp]' prachōdayāāte || 6 ||

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रम्ह प्रचोदयात् ॥७॥

vēdāt'manāya vid'mahē hiraṇ'yagar'bhāya dhīmahi |
tan'nōōb' bram'hap' prachōdayāāte || 7 ||

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥८॥

nārāyaṇāya vid'mahē vāsudēvāya dhīmahi |
tan'nō vish'ṇu[fp]' prachōdayāāte || 8 ||

वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि ।
तन्नो नारसिꣳहः प्रचोदयात् ॥९॥

vaj'ranakhāya vid'mahē
tīk'shṇadag'gesh'ṭrāya dhīmahi |
tan'nō nārasigm'ha[fp]' prachōdayāāte || 9 ||

भास्कराय विद्महे महद्युतिकराय धीमहि ।
तन्नो , आदित्यः प्रचोदयात् ॥ १० ॥

bhās'karāya vid'mahē mahad'yutikarāya dhīmahi |
tan'nō , ādit'ya[fp]' prachōdayāāte || 10 ||

वैश्वानराय विद्महे लालीलाय धीमहि ।
तन्नो , अग्निः प्रचोदयात् ॥ ११ ॥

vaiśh'vānarāya vid'mahē lāḻīlāya dhīmahi |
tan'nō , ag'ni[fp]' prachōdayāāte || 11 ||

कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥ १२ ॥

kāt'yāyanāya vid'mahē kan'yakumāri dhīmahi |
tan'nō dur'gi[fp]' prachōdayāāte || 12 ||

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Pavamāna Sūktam

[(1) KYV TS 5-6-1-1 to 5-6-1-4     (2) KYV TB 1-4-8-1 to 1-4-8-6]

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न , आपः शꣳ स्योना भवन्तु ॥ १ ॥

ॐ hiraṇ'yavar'ṇāśh' śhuchaya[fp]' pāvakā yāsu
jāta[hk]' kaśh'yapō yās'vin'draḥa |
ag'niñ' yā gar'bhan' dadhirē virūpās'tā na , āpaśh'
śhag'ges' syōnā bhavan'tu || 1 ||

यासा॒ꣳ राजा॒ वरु॑णो॒ याति॒ मध्ये॑ सत्यानृ॒ते , अ॑व॒पश्य॒ं जना॑नाम् ।
म॒धु॒श्चुत॒ः शुच॑यो॒ याः पा॑व॒कास्ता न॒ , आप॒ः शꣳ स्यो॒ना भ॑वन्तु ॥ २ ॥

yāsāgm' rājā varuṇō yāti madh'yē sat'yānṛtē ,
avapaśh'yañ' janānām ।
madhuśh'chutaśh' śhuchayō yā[fp]' pāvakās'tā na ,
āpaśh' śhag'ges' syōnā bhavan'tu ॥ 2 ॥

यासा॑ं दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या , अ॒न्तरि॑क्षे ब॒हु॒धा भव॑न्ति ।
याः पृ॑थि॒वीं पय॑सो॒न्दन्ति॑ शु॒क्रास्ता न॒ , आप॒ः शꣳ स्यो॒ना भ॑वन्तु ॥ ३ ॥

yāsāān' dēvā divi kṛṇ'van'ti bhak'ṣhañ' yā ,
an'tarik'ṣhē bahudhā bhavan'ti ।
yā[fp]' pṛthivīm' payasōn'dan'ti śhuk'rās'tā na ,
āpaśh' śhag'ges' syōnā bhavan'tu ॥ 3 ॥

शि॒वेन॑ मा॒ चक्षु॑षा पश्यताऽऽपः शि॒वया॑ त॒नुवोप॑ स्पृशत॒ त्वच॑ं मे ।

śhivēna mā chak'ṣhuṣhā paśh'yatā (ā)paśh' śhivayā
tanuvōpas' spṛśhatat' tvacham' mē ।

सर्वा॑ꣳ अ॒ग्नीꣳ र॑प्सु॒षदो॑ हुवे॒ वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ नि ध॑त्त ॥ ४ ॥

sar'vāgm' , ag'nīgm' rap'suṣhadō huvē vō mayi
var'chō balamōjō ni dhat'ta ॥ 4 ॥ (1)

पव॑मान॒ः सुव॒र्जन॑ः । प॒वित्रे॑ण॒ विच॑र्षणिः । यः पोता॒ स पु॑नातु मा ॥ ५ ॥

pavamānas' suvar'janaḥa । pavit'rēṇa vichar'ṣhaṇiḥi ।
ya[fp]' pōtā sa punātu mā ॥ 5 ॥



www.vedavishwa.com

पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व , आयवः ॥६॥

punan'tu mā dēvajanā-ḥa | punan'tu manavō dhiyā |
punan'tu viśh'va , āyavaḥa || 6 ||

जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।
शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूꣳ रनु ॥७॥

jātavēda[fp]' pavit'ravate | pavit'rēṇa punāhi mā |
śhuk'rēṇa dēva dīd'yate |
ag'nēk' krat'vāk' kratūgm' ranu || 7 ||

यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । ब्रम्ह तेन पुनीमहे ॥८॥

yat'tē pavit'ramar'chiṣhi | ag'nē vitataman'tarā |
bram'ha tēna punīmahē || 8 ||

उभाभ्याँ देव सवितः । पवित्रेण सवेन च । इदं ब्रम्ह पुनीमहे ॥९॥

ubhābh'yāān' dēva savitaḥa | pavit'rēṇa savēna cha |
idam' bram'ha punīmahē || 9 ||

वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः ।

vaiśh'vadēvī punatī dēv'yāgāāte |
yas'yai bah'vīs'tanuvō vītapṛṣh'ṭhā-ḥa |

तया मदन्तः सधमाद्येषु । वयꣳ स्याम पतयो रयीणाम् ॥१०॥

tayā madan'tas' sadhamād'yēṣhu |
vayag'ges' syāma patayō rayīṇām || 10 ||

वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयो भूः ।

vaiśh'vānarō raśh'mibhir'mā punātu |
vāta[fp]' prāṇēnēṣhirō mayō bhū-ḥu |



www.vedavishwa.com

द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ॥ ११ ॥

dyāvāpṛthivī payasā payōbhiḥi ǀ
ṛtāvarī yaj'ñiyē mā punītām ǁ 11 ǁ

बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देव मन्मभिः । अग्ने दक्षैः पुनाहि मा ।
येन देवा , अपुनत । येनाऽऽपो दिव्यं कशः । तेन दिव्येन ब्रम्हणा ।
इदं ब्रम्ह पुनीमहे ॥ १२ ॥

bṛhad'bhis' savitas'tṛbhiḥi ǀ
var'ṣhiṣh'ṭhair'dēva man'mabhiḥi ǀ
ag'nē dak'ṣhaiī[fp]' punāhi mā ǀ
yēna dēvā , apunata ǀ yēnā (ā)pō div'yaṅ' kaśhaḥa ǀ
tēna div'yēnab' bram'haṇā ǀ
idam' bram'ha punīmahē ǁ 12 ǁ

यः पावमानीरध्येति । ऋषिभिः सम्भृतꣳ रसम् । सर्वꣳ स पूतमश्नाति ।

ya[fp]' pāvamānīrad'dhyēti ǀ
ṛshibhis' sam'bhṛtagm' rasam'm ǀ
sar'vagm' sa pūtamaśh'nāti ǀ

स्वदितं मातरिश्वना । पावमानीर्यो , अध्येति ।

svaditam' mātariśh'vanā ǀ pāvamānīr'yō , adh'yēti ǀ

ऋषिभिः सम्भृतꣳ रसम् । तस्मै सरस्वती दुहे ।
क्षीरꣳ सर्पिर्मधूदकम् ॥ १३ ॥

ṛshibhis' sam'bhṛtagm' rasam'm ǀ
tas'mai saras'vatī duhē ǀ
kṣhīragm' sar'pir'madhūdakam ǁ 13 ǁ

www.vedavishwa.com

पावमानीः स्वस्त्ययनीः । सुदुघा हि पयस्वतीः । ऋषिभिः सम्भृतो रसः ।
pāvamānīs’ svas’tyayanī-ḥi |
sudughā hi payas’vatī-ḥi | ṛṣhibhis’ sam’bhṛtō rasaḥa |

ब्राम्हणेष्वमृतꣳ हितम् । पावमानीर्दिशन्तु नः । इमं लोकमथो , अमुम् ।
brām’haṇēṣh’vamṛtagm’ hitam |
pāvamānīr’diśhan’tu naḥa | imaṁ’ lōkamathō , amum |

कामान्त्समर्धयन्तु नः । देवीर्देवैः समाभृताः । पावमानीः स्वस्त्ययनीः ।
kāmān’tsamar’dhayan’tu naḥa |
dēvīr’dēvais’ samābhṛtā-ḥa |
pāvamānīs’ svas’tyayanī-ḥi |

सुदुघा हि घृतश्चुतः । ऋषिभिः सम्भृतो रसः ।
ब्राम्हणेष्वमृतꣳ हितम् ॥१४॥
sudughā hi ghṛtaśh’chutaḥa |
ṛṣhibhis’ sam’bhṛtō rasaḥa |
brām’haṇēṣh’vamṛtagm’ hitam ॥ 14 ॥

येन देवाः पवित्रेण । आत्मानं पुनते सदा । तेन सहस्रधारेण ।
पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतोद्यामꣳ हिरण्मयम् ।
yēna dēvā[fp]’ pavit’rēṇa | āt’mānam’ punatē sadāā |
tēna sahas’radhārēṇa | pāvamān’ya[fp]’ punan’tu mā |
prājāpat’yam’ pavit’ram’m |
śhatōd’yāmagm’ hiraṇ’mayam’m |

तेनं ब्रम्हविदों वयम् । पूतं ब्रम्ह पुनीमहे । इन्द्रः सुनीती सह मां पुनातु ।
tēnab' bram'havidō vayam |
pūtam' bram'ha punīmahē |
in'dras' sunītī saha mā punātu |

सोमः स्वस्त्या वरुणः समीच्यां । यमो राजां प्रमृणाभिः पुनातु मा ।
जातवेदा मोर्जयन्त्या पुनातु ॥ १५ ॥
sōmas' svas'tyā varuṇas' samīt'chyāā |
yamō rājāāp' pramṛṇābhi[fp]' punātu mā |
jātavēdā mōr'jayan'tyā punātu || 15 || (2)

भूर्भुवस्सुवः ॥ (तच्छंयोरावृणीमहे...)
bhūr'bhuvas'suvaḥa || (tat'chhañ'yōrāvṛṇīmahē...)
ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Mantra Puṣhpam

[KYV TA 1-22-1 to 1-22-7]

ॐ योऽपां पुष्पं वेद । पुष्पवान्प्रजावान्पशुमान्भवति ।
चन्द्रमा वा , अपां पुष्पम् । पुष्पवान्प्रजावान्पशुमान्भवति ॥ १ ॥
ॐ yō (a)pām' puṣh'pam' vēda |
puṣh'pavān' prajāvāān' paśhumān' bhavati |
chan'dramā vā , apām' puṣh'pam'm |
puṣh'pavān' prajāvāān' paśhumān' bhavati || 1 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvaṁ' vēda | yō (a)pāmāyatanaṁ' vēda |
āyatanavān'bhavati |

www.saivedavishwa.com

अग्निर्वा , अपामायतनम् । आयतनवान्भवति । योँऽग्नेरायतनं वेद ।
आयतनवान्भवति । आपो वा , अग्नेरायतनम् । आयतनवान्भवति ॥२॥

ag'nir'vā , apāmāyatanam । āyatanavān'bhavati ।
yōō (a)g'nērāyatanaṁ' vēda । āyatanavān'bhavati ।
āpōvā , ag'nērāyatanam । āyatanavān'bhavati ॥ 2 ॥

य , एवं वेद । योँऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvaṁ' vēda । yō (a)pāmāyatanaṁ' vēda ।
āyatanavān'bhavati ।

वायुर्वा , अपामायतनम् । आयतनवान्भवति । यो वायोरायतनं वेद ।
आयतनवान्भवति । आपो वै वायोरायतनम् । आयतनवान्भवति ॥३॥

vāyur'vā , apāmāyatanam । āyatanavān'bhavati ।
yō vāyōrāyatanaṁ' vēda ।
āyatanavān'bhavati । āpō vai vāyōrāyatanam ।
āyatanavān'bhavati ॥ 3 ॥

य , एवं वेद । योँऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvaṁ' vēda । yō (a)pāmāyatanaṁ' vēda ।
āyatanavān'bhavati ।

असौ वै तपन्नपामायतनम् । आयतनवान्भवति ।
योँऽमुष्य तपत , आयतनं वेद । आयतनवान्भवति ।
आपो वा , अमुष्य तपत , आयतनम् । आयतनवान्भवति ॥४॥

asau vai tapan'napāmāyatanam । āyatanavān'bhavati ।
yō (a)muṣh'ya tapata , āyatanaṁ' vēda ।
āyatanavān'bhavati ।
āpō vā , amuṣh'ya tapata , āyatanam ।
āyatanavān'bhavati ॥ 4 ॥

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ' vēda | yō (a)pāmāyatanaṁ' vēda |

āyatanavān'bhavati |

चन्द्रमा वा , अपामायतनम् । आयतनवान्भवति ।
यश्चन्द्रमस , आयतनं वेद । आयतनवान्भवति ।
आपो वै चन्द्रमस , आयतनम् । आयतनवान्भवति ॥५॥

chan'dramā vā , apāmāyatanam | āyatanavān'bhavati |
yaśh' chan'dramasa , āyatanaṁ' vēda |
āyatanavān'bhavati |
āpō vai chan'dramasa , āyatanam |
āyatanavān'bhavati || 5 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ' vēda | yō (a)pāmāyatanaṁ' vēda |

āyatanavān'bhavati |

नक्षत्राणि वा , अपामायतनम् । आयतनवान्भवति ।
यो नक्षत्राणामायतनं वेद । आयतनवान्भवति ।
आपो वै नक्षत्राणामायतनम् । आयतनवान्भवति ॥६॥

nak'ṣhat'rāṇi vā , apāmāyatanam | āyatanavān'bhavati |
yō nak'ṣhat'rāṇāmāyatanaṁ' vēda |
āyatanavān'bhavati | āpō vai nak'ṣhat'rāṇāmāyatanam |
āyatanavān'bhavati || 6 ||

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।

ya , ēvaṁ' vēda | yō (a)pāmāyatanaṁ' vēda |

āyatanavān'bhavati |

पर्जन्यो वा , अपामायतनम् । आयतनवान्भवति ।
यः पर्जन्यस्याऽऽयतनं वेद । आयतनवान्भवति ।
आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान्भवति ॥७॥

par'jan'yō vā , apāmāyatanam । āyatanavān'bhavati ।
ya[fp]' par'jan'yas'yā (ā)yatanaṁ' vēda ।
āyatanavān'bhavati । āpō vai par'jan'yas'yā (ā)yatanam ।
āyatanavān'bhavati ॥ 7 ॥

य , एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति ।
ya , ēvaṁ' vēda । yō (a)pāmāyatanaṁ' vēda ।
āyatanavān'bhavati ।

संवत्सरो वा , अपामायतनम् । आयतनवान्भवति ।
यस्संवत्सरस्याऽऽयतनं वेद । आयतनवान्भवति ।
आपो वै संवत्सरस्याऽऽयतनम् । आयतनवान्भवति ॥८॥

saṁ'vat'sarō vā , apāmāyatanam । āyatanavān'bhavati ।
yas'saṁ'vat'saras'yā (ā)yatanaṁ' vēda ।
āyatanavān'bhavati ।
āpō vai saṁ'vat'saras'yā (ā)yatanam ।
āyatanavān'bhavati ॥ 8 ॥

य , एवं वेद । योँऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥९॥
ya , ēvaṁ' vēda ।
yōō (a)p'su nāvam' pratiṣh'ṭhitāṁ' vēda ।
prat'yēva tiṣh'ṭhati ॥ 9 ॥



www.sanvedavishwa.com

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु ।

rājādhirājāyap' prasah'yasāhineē |
namō vayaṁ' vaiśh'ravaṇāya kur'mahē |
sa mē kāmān'kāmakāmāya mah'yam'm |
kāmēśh'varō vaiśh'ravaṇō dadātu |

कुबेराय वैश्रवणाय । महाराजाय नमः ॥१०॥
kubērāya vaiśh'ravaṇāya | mahārājāya namaḥa || 10 ||

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Samāna Sūktam

[RV S 10-191]

ॐ संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य , आ ।
इळस्पदे समिध्यसे स नो वसून्या भर ॥१॥
ॐ saṁ'samid'yuvasē vṛshan'nag'nē
viśh'vāān'yar'ya , ā |
iḻas'padē samidh'yasē sa nō vasūn'yā bhara || 1 ||

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना , उपासते ॥२॥
saṅ' gat'chhadh'vaṁ' saṁ' vadadh'vaṁ'
saṁ' vō manāāṁ'si jānatām |
dēvā bhāgañ' yathā pūr'vēē sañ'jānānā , upāsatē || 2 ||



www.sanskritveda.net
www.vedavishwa.com

समा॒नो मन्त्रः॒ समि॑तिः समा॒नी स॑मा॒नं मनः॑ स॒ह चि॒त्तमे॑षाम् ।
स॒मा॒नं मन्त्र॑म॒भि मन्त्र॑ये वः समा॒नेन॑ वो ह॒विषा॑ जुहोमि ॥३॥

samānō man'tras' samitis' samānī
samānam' manas' saha chit'tamēēṣhām |
samānam' man'tramabhi man'n'trayē
vas' samānēna vō haviṣhāā juhōmi || 3 ||

स॒मा॒नी व॒ , आकू॑तिः समा॒ना हृद॑यानि वः ।
स॒मा॒नम॑स्तु वो॒ मनो॒ यथा॑ वः॒ सु॒सहास॑ति ॥४॥

samānī va , ākūūtis' samānā hṛdayāni vaḥa |
samānamas'tu vō manō yathāā vas' susahāsati || 4 ||

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||

## Svasti Vāchaka Śhlōka

(As chanted in Prasanthi Nilayam)

ॐ स्व॒स्ति प्र॒जाभ्यः॑ परि॒पाल॑यन्ता॒म् । न्या॒येन॑ मा॒र्गेण॑ म॒हीं म॑हीशा॒ः ॥
ॐ svas'tip' prajābh'ya[fp]' paripālayan'tām |
nyāyēna mār'gēṇa mahīm' mahīśhā-ḥa ||

गो ब्राम्हनेभ्यः शु॒भम॑स्तु नित्य॒म् । स॒मस्त॑लो॒काः सु॒खिनो भ॑वन्तु ॥ (3x)
gōb' brām'haṇēbh'yaśh' śhubhamas'tu nit'yam |
samas'talōkās' sukhinō bhavan'tu || (3x)

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ||



www.saiveda.net www.vedavishwa.com

## Kṣhamā Prārthanā

[svaras as per CD '*Veda pārāyaṇam*' ]

ॐ यदक्षरपदभ्रष्टं मात्राहीनं तु यद् भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तुते ।

ॐ yadak'ṣharapadabh'raṣh'ṭam'
māt'rāhīnan' tu yad' bhavē-te ।
tat'sar'vaṅ' kṣham'yatān' dēva
nārāyaṇa namōs'tutē ।

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व साईश्वर ।

visar'gabin'dumāt'rāṇi padapādāk'ṣharāṇi cha ।
nyūnāni chātirik'tānik' kṣhamas'va sāīśh'vara ।

अपराध सहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व साईश्वर ।

aparādha sahas'rāṇik' kriyan'tē (a)har'niśham' mayā ।
dāsō (a)yamiti mām' mat'vāk' kṣhamas'va sāīśh'vara ।

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष साईश्वर ।

an'yathā śharaṇan' nās'tit' tvamēva śharaṇam' mama ।
tas'māt' kāruṇ'ya bhāvēna rak'ṣha rak'ṣha sāīśh'vara ।

हरिः ॐ तत्सत् , श्री साईश्वरार्पणमस्तु ।
harihi , ō-n tat' sate , śhrī sāīśh'varār'paṇamas'tu ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

1. Gaṇapati Prārthanā ................................ 1
2. Gaṇapati Atharva Śhīrṣha Upaniṣhat ..... 1
3. Śhivōpāsanā Mantrāḥa .......................... 10
4. Laghunyāsaḥa ....................................... 14
5. Śhrī Rudra Namaka ............................... 17
6. Śhrī Rudra Chamaka .............................. 36
7. Puruṣha Sūktam...................................... 47
8. Nārāyaṇa Sūktam .................................. 54
9. Nārāyaṇa Upaniṣhat ............................... 59
10. Śhraddhā Sūktam .................................. 63
11. Dūrvā Sūktam ....................................... 65
12. Durgā Sūktam ....................................... 66
13. Mēdhā Sūktam ........................................ 68
14. Sarva Dēvatā Gāyatrī ............................ 70
15. Pavamāna Sūktam .................................. 72
16. Mantra Puṣhpam..................................... 77
17. Samāna Sūktam ...................................... 81
18. Svasti Vāchaka Śhlōka .......................... 82
19. Kṣhamā Prārthanā ................................ 83



**R**oman **C**oloured **C**oding **S**cript

© www.saiveda.net

www.saiveda.net www.vedavishwa.com